91. In the confluence of rivers, holy places, forts, hermitages, one should construct houses according to the type of the site, as no fault of direction is counted therein.

Thus ends the rule of Orientation.

92. In ancient times, after killing the demon *Andhaka*, a drop of sweat from *Śiva's* forehead fell down on the earth and out of that an unbearable spirit was born.

93. Immediately, the Gods placed him on the earth keeping his face down. His thigh, torso, legs were placed in the corners and the head was placed in the North East.

94. Forty-five deities are presiding over the body of *Vāstu*. Among them eight deities reside outside. Because of the God's settling therein, it is known as *Vāstu*.

95. As he was made to face downwards, so thirteen offerings should be made to him, and by this there will be peace; otherwise, there will be loss and destruction.

96. During the initial start and further alterations to the palace, house etc it is auspicious if he (*Vāstudeva*) is propitiated in all *Vāstukarma*.

[१६२]मत्स्यपुराणे ॥

सूत्रारम्भे [१६३]शिलान्यासे द्वारवंशोच्छ्रयेऽपि च।
प्रवेशे शान्तिकार्ये च वास्तु[१६४]यज्ञस्तु पञ्चधा ॥ ९७ ॥

एकपादोदितो वास्तुर्यावत्पदसहस्रकम्।
द्वात्रिंशन्मण्डलानि[१६५] स्युः क्षेत्रतुल्याकृतीनि च ॥ ९८ ॥

एकाशीतिपदो वास्तुश्चतुःषष्टिपदोऽथवा।
सर्ववास्तुविभागेषु पूजये[१६६]न्मण्डलद्वयम् ॥ ९९ ॥

यद्वा ॥

चतुःषष्ट्या [१६७]पुरग्रामे मर्मराजगृहेषु [१६८]च।
एकाशीत्या पदैर्गेहे शतेनार्चे सुरालये ॥ १०० ॥

सर्ववास्तु[१६९]विभागेषु [१७०]विज्ञेया नवका[१७१] नव।
[१७२]प्रासादेष्वेवमेवस्याद्वापीकूपेषु चैव हि ॥ १०१ ॥

ईशो मूर्धनि [१७२]पर्जन्यो दक्षिणं कर्णमाश्रितः।
जयस्कन्धे[१७३]महेन्द्राद्याः पञ्च दक्षिणबाहुगाः ॥ १०२ ॥

---

१६२. मात्स्ये in B, D, E
१६३. शिल्पा in A
१६४. यजत्स्तुं in A
१६५. द्वाविंश- in A
१६६. न्मण्डले in DE
१६७. पुरे in E
१६८. तं in A
१६९. विभावेषु in A
१७०. विज्ञेयाकानवा in B
१७१. E gives marginal note देवगृहादि
१७२. जर्जन्यो in A
१७३. मेहेन्द्राद्या in A

(In the) Matsyapurāṇa

97. *Vāstuyajña* is of five types and this should be performed in the measurement of the thread, laying of the foundation stone, in the erection of the door beam, in the first entry of the house and for ushering peace.

98. The ground plan of a *Vāstu* starts from one square (*Pāda*) to thousand squares. According to the shape of the land, the diagram (*Maṇḍala*) ground plan can be of thirty-two types.

99. Among all the divisions of *Vāstu,* two ground plans are to be counted as the best. They are eighty-one squares or sixty-four squares(*Pāda*).

Otherwise

100. The sixty-four square plan in suitable for a town, village, royal palace made of stone, while a house is to be built on the eighty-one square plan and a temple should be erected on the hundred square plan.

101. The ground plan of *Vāstu* is to be divided nine into nine (square). The same is to be followed for the water-tank and well.

(Now the position of the Gods on *Vāstudeva* is presented).

102. *Īśa* rests on the head while *Parjanya* rests on the right ear, *Jaya* rests on the shoulder, *Mahendra* and the other five *Devas* reside on the right hand.

महेन्द्रादित्यसत्याश्च वृष आकाशमेव ते।
वह्निर्जानुनि पूषाद्याः सप्तपादतलोस्थिताः ॥ १०३ ॥

पूषाऽथ वितथश्चैव [१७४]गृहक्षतो यमस्तथा।
गन्धर्वो भृङ्गराजश्च मृगसप्तसुरा इति ॥ १०४ ॥

पादयोः पितरस्तस्मात्सप्त[१७५]पादतलास्थिताः।
दौवारिकोऽथसुग्रीवपुष्पदन्तो [१७६]जलाधिपः ॥ १०५ ॥

असुरः शोषयक्ष्माणौ रोगो जानुनि संस्थितः।
[१७७]नागो मुख्यश्च भल्लाट सोमः शैलश्च बाहुगाः ॥ १०६ ॥

अदितिः स्कन्धदेशेऽस्य वामकर्णे दितिः स्थिताः।
द्वात्रिंशद्बाह्यगादेवा नाभिपृष्ठे स्थितो विधिः ॥ १०७ ॥

अर्यमा दक्षिणे वामे स्तने तु [१७८]पृथिवीधरः।
विवस्वानथ [१७९]मित्रश्च दक्षवामोरुगावुभौ ॥ १०८ ॥

आपःकण्ठे स्थितो [१८०]वास्तोरापवत्सो हृदि स्थितः।
सावित्रः सविता तद्वत् करं दक्षिणमाश्रितौ ॥ १०९ ॥

इन्द्र इन्द्र[१८१]जयो [१८२]मेण्ढ्रे [१८३]रुद्रो वामेकरेऽस्य च।
रुद्र[१८४]दासोऽपि तत्रैव इति देवमयं वपुः ॥ ११० ॥

---

१७४. गृहक्षा यमः in B
१७५. पादलता in A
१७६. जनाधिपत् in A
१७७. नागा in A
१७८. पृथवी in A
१७९. मित्रस्य in A
१८०. वास्तोपेंरोवत्स्थ्यैहर्यदिगं in C
१८१. जययो in A
१८२. मेद्रे in BCDE
१८३. रुड्ये in A
१८४. दाजो in C

103. They are *Mahendra, Āditya, Satya, Vṛṣa* and *Ākāśa*. *Vahni* rests on the knee. Starting from *Pūṣā* seven other deities reside on the feet.

104. *Pūṣā, Vitatha, Gṛhakṣata* as well as *Yama, Gandharva, Bhṛṅgarāja* and *Mṛga* - these are the seven deities.

105. In between the two feet the seven *Pitṛs* take rest. *Dauvārika, Sugrīva, Puṣpadanta,* and *Jalādhipa* reside under the feet.

106. *Asura, Śoṣa, Yakṣmā and Roga* reside on the knee, *Nāga, Mukhya, Bhallāṭa, Soma, Śaila* reside on the hand.

Aditi rests on the shoulder and *Diti* resides on the left ear. There are

107. thirty-two external Gods who live in the outer periphery. The lord *Brahma* (*Vidhi*) rests on the navel part.

108. *Aryamā* rests on the right breast while *Pṛthivīdhara* rests on the left breast. Both *Vivasvān* and *Mitra* rest on the right (*Dakṣa*) and left thighs (*Uru*).

109. *Āpa* rests on the neck, and *āpavatsa* resides on the heart of the *Vāstu*. Likewise, *Sāvitra* and *Savitā* rest on the right palm.

110. *Indra* and *Indrajaya* rest on the penis(Mendhra). Also, *Rudra* and *Rudradāsa* rest on the left palm. So, the whole body of *Vāstu* is full of Gods.

भूमीं [१८५]परीक्ष्य तां पञ्चगव्यैरा[१८६]सेचयेत्सुधीः ।
पश्चाद्वास्तुं लिखेद्रन्तहेमरौप्यफलादिभिः ॥ १११ ॥

काष्ठांगारनखैः शस्त्रैर्लिखितो भयकारकः ॥ ११२ ॥

तथा चापराजिते ॥

ततो [१८७]वास्तुः सुसंपूज्य[१८८]स्तत्र [१८९]क्षेत्रे सुकल्पिते ।
पुष्पाक्षतैः समालिख्य निलयादिप्रमाणतः ॥ ११३ ॥

चतुःषष्टि पदे वास्तौ मध्ये ब्रह्मा युगांशकः ।
अर्यमाद्याश्चतुर्भागा मध्यकोणे द्विभागिकाः ॥ ११४ ॥

बाह्यकोणेषु[१९०] सार्द्धांशा शेषाः एकपदा सुराः ।
एकाशीतिपदे वास्तौ ब्रह्मा मध्ये नवांशकैः ॥ ११५ ॥

षठ्पदा अर्यमाद्याः स्युर्द्व्यंशः कोणेषु मध्यगाः ।
सर्वेऽपि भागिका बाह्ये [१९१]देवा अथ शतांशके ॥ ११६ ॥

ब्रह्मा तु षोडशपदो वश्वंशा अर्यमादयः ।
[१९२]बाह्यकोणेषु सार्धांशा शेषाः स्युः पूर्ववास्तुवत् ॥ ११७ ॥

[१९३]इशश्चैव तु पर्जन्यो जयन्तः शक्रभास्करौ ।
सत्यो भृशोऽम्बरं चेति देवान्पूर्वे प्रपूजयेत् ॥ ११८ ॥

---

१८५. परीक्ष्यती in A
१८६. सौच्य बुद्धिमान् in B सोच्य बुद्धिमान् in CDE
१८७. वास्तुस्तु संपूज्य in A
१८८. त्रेत्रे in A
१८९. Ms E given note गृहादि
१९०. वार्द्धांशाः in e, चार्द्धायाः in BDE
१९१. दैवा in B.C. दैव in DE
१९२. वारुणी in A
१९३. A writes इशान and omits तु

111. A wise man will examine the land first, and then sprinkle it with *Pañcagavya*[7]. Later on, he will draw the plan of *Vāstu* with a sharp stick (*Phalā*) made of gems, gold or silver.

112. If written with wood, charcoal, nails or sharp weapons it is inauspi- cious.

Likewise in the Aparājitapṛcchā.

113. Then *Vāstu* should be worshipped properly and the ground plan should be in accordance with the conception. According to the size of the house, decorations should be done with flowers and rice(*Akṣata).*

114. In the *Vāstu* plan of sixty-four squares, *Brahmā* will occupy the central four *Pādas Aryamā* and others will occupy the four *Pādas* and the corners will be divided into two sections in the middle part.

115. *Pādas* in the outer corners will be divided into half. The rest of the squares will be occupied by the deities, each having one square. In the eighty one square ground plan, *Brahmā* will occupy the central nine squares.

116. *Aryamā* and others will occupy six squares, and the inner corners will be divided into two squares each. In a hundred square plan all deities will occupy one *Pāda* each in the outer periphery.

117. *Brahmā* occupies sixteen squares, *Aryamā* and other deities occupy eight *Pādas* each. The outer corners are to be divided into half and the rest will be like the previous ground plan.

118. *Iśa, Parjanya, Jayanta, Śakra, Bhāskara, Satya, Vṛṣa, Ambara-* these deities will be worshipped on the Eastern periphery.

---

7. *Pañcagavya* - Milk, Curd, Honey, *Gomaya* (cow dung) *Gocanā*..

[१९४]अग्निः पूषाऽथ वितथो [१९५]गृहक्षतयमौ तथा।
गन्धर्वो भृङ्गराजश्च मृग[१९६]इत्यष्ट दक्षिणे॥ ११९॥

पितरोद्वारस्थ सुग्रीवपुष्पदन्तजलाधिपाः।
असुरः शोषयक्ष्माणौ इत्यष्टौ पश्चिमे यजेत्॥ १२०॥

[१९७]रोगो नागश्च मुख्यश्च भल्लाटः सोम एव च।
शैलोऽदिति[१९८]र्दितिश्चेति देवानुत्तरतोऽर्चयेत्॥ १२१॥

आपापवत्सावीशाने मध्यकोणे [१९९]प्रपूजयेत्।
सावित्रः सविताग्रेये इन्द्र[२००]श्चेन्द्रजयोऽन्यतः॥ १२२॥

[२०१]रुद्रं च रुद्रराजं च[२०२] वायव्ये द्वौ समर्चयेन्।
अर्यमा पूर्वदिग्भागे [२०३]विवस्वान् इह दक्षिणे॥ १२३॥

मित्रस्तु पश्चिमे तद्वदुत्तरे [२०४]पृथिवीधरः।
ब्रह्मागर्भे सुरा एवं संपूज्या सर्ववास्तुषु॥ १२४॥

ईशाने चरकीं बाह्ये पिलिपिच्छां तु पूर्वतः।
विदारीमग्निकोणे च[२०५] जम्भां याम्यदिगाश्रितान्॥ १२५॥

---

१९४. अग्र in A
१९५. ग्रह in BCD
१९६. इष्टत्ये in C
१९७. A omits V 121
१९८. दिश्चोति in B दिश्चेति in C
१९९. प्रभुजयेत् in A
२००. श्चेन्द्रयोजन्तः in A
२०१. रुद्रांश्च in DE
२०२. वायव्यो in A, वायवे in e
२०३. विविस्वान् in B
२०४. पृथवीधरः in A
२०५. जृभं in C, जृभां in E

119. *Agni, Pūṣā, Vitatha, Gṛhakṣata, Yama, Gandharva, Bhṛṅgarāja, Mṛga*- these eight deities reside on the Southern periphery.

120. *Pitara, Udvāstha, Sugrīva, Puṣpadanta, Jalādhipa, Asura, Śoṣa, Yakṣma*,- these eight deities should be offered sacrifice (*Yajña*)on the Western periphery.

121. *Roga, Nāga, Mukhya, Bhallāṭa, Soma, Śaila, Aditi* and *Diti* - these eight deities should be paid homage on the Northern periphery.

122. *Āpa* and *Āpavatsya* should be worshiped on the central corner of the North-East direction (*Īśāna*), *Sāvitra* and *Savitā* on the South-East direction (*āgneye*). *Indra* and *Indrajaya* should be worshipped on the South-West direc- tion.

123. *Rudra* and *Rudrarāja* are to be worshipped on the North West direction (*Vāyavya*). *Aryamā* resides on the Eastern direction; likewise *Vivasvān* on the South.

124. *Mitra* rests on the Western direction; likewise *Pṛthivīdhara* on the Northern direction. *Brahmā* resides on the central part. Thus in all ground plans will the Gods be worshipped.

125. Outside the *Maṇḍala, Carakī* rests on the North-East corner (*Īśāna*). *Pilipicchā* rests on the East. *Vidārī* rests on the South-West (*Agni*) and *Jambhā* occupies the South.

[२०६]नैर्ऋत्ये पूतनां स्कन्दां पश्चिमेऽथ मरुद्दिशि।
तां पापराक्षसीं वास्तोः सौम्ये [२०७]यमदिशान् यजेत्॥ १२६॥

हेतुकादींश्च [२०८]तद्बाह्ये क्षेत्रेशानष्ट पूजयेत्।
हेतुकस्त्रिपुरघ्नश्च वेताल[२०९]श्चाग्निजिह्वकः॥ १२७॥

कालः कराल [२१०]एकांघ्रिर्भीमश्चेत्यष्ट भैरवाः।
देवीः क्रूरां यमादींश्च माषान्नैः सुरयामिषैः॥ १२८॥
अपरान् घृतपक्वान्नैः सर्वान् गन्धादिहेमभिः॥ १२९॥

तथा च।

कुण्डे त्रिमेखले हस्तमिते होमं समाचरेत्।
क्षीरवृक्षसमिद्भिर्वा पालाशीभिः कुशैरपि॥ १३०॥

होमधान्यैर्नवैः शुद्धैर्मधुसर्पिसमन्वितैः।
यव[२११]प्रियङ्गुगोधूमैस्तिलैर्ब्रीहिभिरेव वा॥ १३१॥

बिल्वैर्वापि पृथक्कुर्याद्धोममष्टोत्तरं शतम्।
अष्टाधिकां विंशतिं वा [२१२]प्रतिदैवतमाचरेत्॥ १३२॥

ततो मण्डलं [२१३]संस्थाप्य देवताभ्यो बलिं हरेत्।
एवं संपूजिता देवाः शान्तिं कुर्वन्ति ते सदा॥ १३३॥

राक्षसानां बलिर्देयो [२१४]मांसौदनमयस्तथा।
ततः सर्वौषधिसस्नानं यजमानस्य कारयेत्॥ १३४॥

---

२०६. नैऋत्यः in A
२०७. चार्यमाणं in C
२०८. तद्बाध्येपि in A
२०९. स्थाग्निजिकक: in A
२१०. एकोहि- in BD
२११. प्रयंग in A
२१२. प्रतिदैवमता in A
२१३. संस्ताभ्यो
२१४. मासोदनयस्था in B

126. *Pūtanā* resides on the South-West (*Nairṛta*), *Skanda* rests on the West as on the North-West. *Pāparākṣasī* should be worshipped on the North and Southern side of the *Vāstu*.

On the outer periphery, starting from *Hetuka,* eight lords of the land are to be worshipped. *Hetuka, Tripuraghna, Vetāla, Agnijihva, Kāla, Karāla, Ekāṁghri, Bhīma* are the eight *Bhairavas.*

All *Devīs, Krūṛas, Yama* and others should be worshipped with meat, rice wine and other non-vegetarian items.

127-129. Others are to be offered with rice cooked in ghee, all types of per- fumes and gold.

As well as:-

130. The *Homa* should be performed in a *Kuṇḍa* which is equal to three hand strings (*Mekhalā*). The sacrificial wood is to be collected from *Kṣīravṛkṣa, Palāśa* or *Kuśa.*

131. The *Homa* should be done with fresh corn, pure honey, clarified butter (*Sarpi*), barley(*Yava*), long pepper, saffron(*Priyaṅgu*), wheat, sesamum (*Tila*), or rice.

132. Otherwise one can perform the *Homa* one hundred and eight times separately with *Vilva* or offerings can be offered to each God more than eight times or twenty times.

133. Then the diagram should be drawn and offerings are to be made to the Gods. Thus worshipped, the Gods always bestow peace.

134. *Rākṣasas* are to be worshipped with offerings of meat and rice, then the worshipper (*Yajamāna*) will take a bath in water with many types of medicinal herbs.

द्विजास्तु पूजयेद्भक्त्या ये चान्ये गृहमागताः ।
एतद्वास्तूपशमनं कृत्वा कर्म समाचरेत् ॥ १३५ ॥

प्रासादभवनोद्यानप्रारम्भपरिवर्त्तने ।
[२१५]पुरवेशमप्रवेशे च सर्वदोषोपशान्तये ॥ १३६ ॥

अनेन विधिना यस्तु प्रतिसंवत्सरं बुधः ।
गृहे वायतने [२१६]कुर्यान्न स दुःखमवा[२१६]प्नुयात् ॥ १३७ ॥

न च व्याधिभयं तस्य न च वन्धुधनक्षयः ।
जीवेद्वर्षशतं स्वर्गे कल्पमेकं च तिष्ठति ॥ १३८ ॥

इति वास्तूत्पत्तिविन्यासपूजनविधिः ॥

अथ मर्मवास्तुः-

युगास्त्रे वा(ऽ)यते क्षेत्रे चतुःषष्टिविभाजिते ।
मध्ये रेखा स्मृता[२१७]स्तिस्रो वंशापूर्वापरायताः ॥ १३९ ॥

याम्योत्तरायतास्तिस्त्र उपवंशाः [२१८]प्रभिन्नगाः ।
कर्णात्कर्णगतं सूत्रं शिरासंज्ञमिह न्यसेत् ॥ १४० ॥

तत्पार्श्वयोस्तथा [२१९]रेखा भागभागान्तरे इह ।
तत्राष्टसूत्रैः पद्मानि षड्भिर्वज्राणि द्वादश ॥ १४१ ॥

चतुष्कोणेषु शूलानि विकर्णोर्ध्वे तु लाङ्गलम् ।
मर्माणि वंशसंपाता महामर्माम्बुजादिकम् ॥ १४२ ॥

२१५. Ms A omits VI36cd and V137ab
२१६. कुर्यान् रदुरकमवा- in A
२१७. स्तिस्तो in A
२१८. प्रतिन्नगाः in A
२१९. रेखो in AD रेखे in CE

135-136. At the time of alteration or at the commencement of a palace, house and a garden, as well as while entering into the city or a house for the removal of all sorts of evils, the Brahmins and other guests should be worshipped with devotion and in this manner one should start work by appeasing the *Vāstu* God.

137. Following this method, he who performs the worship of *Vāstu* every year in his house or abode will not undergo any misery.

138. Neither he has any fear of diseases, nor loss of friends and prosperity. He lives up to a hundred years and stay in heaven for one *Kalpa*.

Thus ends the origin of Vāstu, its layout and the method of worshipping.

Now the ***Marmavāstu*** :-

139. A square or rectangular plot of land is to be divided into sixty-four parts. Three lines of beams should be drawn in the centre which run from East to West.

140. Three minor lines of beams should be drawn from South to North. Diagonal lines known as *Śirā* are to be drawn from one corner to another corner.

141. Likewise, the side lines should be drawn here and divided accordingly. Eight measuring lines will form a lotus and six measuring lines will form twelve *Vajras*.

Śūlas will be drawn on the four corners and *Lāṅgalas* on the upper part of the *vikarṇa*.

142. The meeting points of the longer diagonals will be known as *Mahāmarma*, *Ambuja*, etc.

पदमध्ये चोपमर्म तानि भित्त्यादितस्त्यजेत्।
[२२०]मर्मभिर्भित्तिभिः स्तम्भैः कीलोच्छिष्टोपघातकैः ॥ १४३ ॥

पीडयेद्यदि तद्वास्तु भवनादिषु हानिकृत्।
[२२१]पदस्य षोडशांशेन द्वादशांशेन वा पुनः ॥ १४४ ॥

मर्ममानं स्मृतं कैश्चिदेकद्वित्र्यंगुलोन्मितम् ॥ १४५ ॥

इति मर्मवास्तुः ॥

सर्वदेवमयस्यापि पुंवास्तोः प्रथमं खनेत्।
कुक्षौ सौख्यं पुराघाते [२२२]शरीरे सर्वसंक्षयः ॥ १४६ ॥

इति खातविधौ पुरुषवास्तुः ॥

विप्रस्याश्वत्थजाः [२२३]कीला युगास्रा रदमात्रिकाः।
क्षत्रियस्याष्टयुग्मांशा वस्वस्राः खदिरोद्भवाः ॥ १४७ ॥

विशां जिनाङ्गुलादीर्घाः षोडशास्राः शिरीषजाः।
[२२४]शूद्रे नखाङ्गुला वृत्ता अर्जुनां जनजा दृढाः ॥ १४८ ॥

सूत्रं स्यादङ्गुल[२२५]स्थूलमष्टदण्डायतं दृढम्।
द्विजानां दर्भजं राज्ञां मौजं काशं भवं विशाम् ॥ १४९ ॥

शूद्राणां शणजं क्षौमं कार्पासं चाखिलेष्वपि।
बहिकोणादितो गेहे [२२६]सृष्ट्या कीलान्प्रविन्यसेत् ॥ १५० ॥

२२०. मर्मणितित्तिभिः in A
२२१. पदमध्ये in A
२२२. शारीरे in AB
२२३. कीलायुलायुगा in B
२२४. शुद्धे in A
२२५. राल in B
२२६. सृष्ट्वा in DE

143-144. At the inception of the foundation, *Upamarmas* should be avoided in the middle of the plot. If that *Vāstu* is afflicted by *Marma*, walls, pillars, nails or unclean things, it will be disastrous for a house.

145. Measurement of the *Marmas* is done by twelve or sixteen units but according to some it is measured by one, two or three fingers.

Thus ends Marmavāstu.

146. Though each of the *Pādas* are occupied by Gods, even then the *Puṁvāstu* is to be dug first of all. It is beneficial if dug in the cavity of the abdomen; if dug on the other parts of the body, it brings destruction.

Such is the principle of digging in the Puruṣavāstu.

147. The house of a Brahmin will have nails made out of the *Aśvattha* tree, it will be thirty-two *Aṅgulas* in measurement and quadrangular in shape. For a *Kṣatriya* it will be sixteen[8] *Aṅgulas*, made out of the *Khadira* tree and octagonal.

148. For a *Vaiśya*, it will be twenty four *Aṅgulas* in length made out of the *Śirīṣa* tree and hexagonal. For a *Śūdra*, it will be twenty *Aṅgulas* made out of the *Arjuna* tree, and it will be strong and circular in shape.

149-150. The thread will be sturdy, eight *Daṇḍas* (32 hands =48 feet) in length and one *Aṅgula* in breadth. For a Brahmin, the thread will be made out of *Darbha* (a type of grass), for a King, out of *Muñja*, for *Vaiśya*, out of *Kāśa*, for *Śūdra*, out of jute, silk, and cotton; these will be made universally. In the laying out of a house, the nails should be inserted from *Vahni* (South-East corner).

---

8 It is twenty eight *Aṅgulas* in A.P.

सूत्र[२२७]च्छेदेन [२२८]सिद्धै स्यादष्टीले विच्युते भयम्।
कीलकेऽवाङ्मुखे रोगस्ततो यत्नं समाचरेत्॥ १५१॥

समारभेत कर्माणि [२२९]अष्टसूत्रविधिक्रमात्।
विद्यादृष्टिकरं मौजं कार्पासमवलम्बकम्॥ १५२॥
काष्ठं च साधकं लेख्यमष्टसूत्राण्यनुक्रमात्॥ १५३॥

इति कीलकारोपणम्॥

नागस्य प्रथमे घाते पुच्छे [२३०]पृष्ठे मुखे भयम्।
वामकुक्षौ भवेत्सौख्यं तस्मात्कुक्षिरिहोच्यते॥ १५४॥

सिंहादि त्रित्रिगे भानौ सृष्ट्या नागमुखं दिशि।
खातं वायौ महेशेऽग्नौ नैर्ऋत्ये शोभनं क्रमात्॥ १५५॥

इति नागवास्तुविधिः।

शल्यज्ञाने फणेचक्रमष्टाविंशतिकोष्ठकम्।
तिर्यक् [२३१]पञ्चोर्ध्वगारेखाः कर्तव्या [२३२]अष्टसन्मिताः॥ १५६॥

द्वारशाखामघायाम्यं द्वारमध्ये च कृत्तिका।
पृष्ठपंक्तौ लिखे[२३३]त्स्वातेः सप्तधिष्ण्यान्यनुक्रमात्॥ १५७॥

चित्रापुनर्वसू रौद्रं मृगशीर्ष धनिष्ठिका।
[२३४]श्रवणं चाभिजित् पंक्तौ द्वितीयायामतो लिखेत्॥ १५८॥

---

२२७. च्छेदोन in A
२२८. सिद्धयै in A, सिध्य in D, सिद्धिं in E
२२९. This अष्टसूत्रविधिः is mentioned in AP ch 55 V15-17
२३०. पृष्ठमुखे in B
२३१ यंत्रोर्द्धग in A पंचोद्धूणा in B
२३२. चाष्ट- in E
२३३. त्वातः in E
२३४. छ्वनं in A

151. If the thread is torn or the pebbles of the measuring thread are displaced, then there is a chance of fear. If the peg faces downwards, there may be disease, so one should take care in placing the nails.

One should start work according to the eightfold procedure of con- struction .

152-153. *Muñja* is conducive to the auspicious look and cotton (*Kārpāsa*) leads to support. Wood is congenial for writing according to the eightfold procedure.

Thus ends the discourse on pegs.

154. In a *Vāstu,* resting on *Nāga,* if the first digging is made on the tail, back or face it will cause fear. But if it is done on the left side of the womb it is regarded as auspicious and is known as *Kukṣi.*

155. If the Sun is on the three Zodiac signs of Leo and others and digging is done on that side where the *Nāga* faces, then it is auspicious and the digging is to be made serially from *Vāyu* (North-West), *Maheśa* (North-East), *Agni* (South-East), and *Nairṛta*(South-West).

Thus ends the rules of Nāgavāstu.

156-157. To know about *Śalya* one should draw a chart of serpents with 28 chambers (*Koṣṭha*). There will be five slanting lines drawn upwardly with eight on the other side. *Maghā* will be on the lower part of the door frame and *Kṛttikā* will be on the centre of the door. On the back row one should put the name of *Svātī* and other seven stars serially.

158. *Citrā, Punarvasū, Raudra* (*Ārdrā*), *Mṛgaśirā, Dhaniṣṭhā, Śravaṇā, Abhijit* -these stars are to be written on the second row.

हस्तः पुष्यस्तथाश्लेषा रोहिणीशततारकम्।
पूर्वभाद्रोत्तराभाद्रं तृतीयायां लिखेत्सुधीः ॥ १५९ ॥

उत्तरफाल्गुनी पूर्वफाल्गुनी पितृमाग्निभे।
भरणी चाश्विनी पौष्णं द्वारपंक्त्या भसप्तकम् ॥ १६० ॥

अश्विन्यादित्रिकं चैव आर्द्रायाश्चैव पञ्चकम्।
[२३५]पूर्वाषाढाचतुष्कं च उत्तरारेवतीद्वयम् ॥ १६१ ॥

एतानि शशीधिष्ण्यानि शेषाणि रविभानि च।
चन्द्रधिष्ण्ये स्थिते सूर्ये [२३६]सूर्य चन्द्रे [२३७]समागते ॥ १६२ ॥

तत्र शून्यं भवेत्स्थानं द्रव्यशल्यविवर्जितम्।
द्रव्यशल्यं विना ह्येवं [२३८]स्वल्पं द्रव्यादि निर्दिशेत् ॥ १६३ ॥

चन्द्रपूर्वापरो भानुस्तत्र शल्यं विनिर्दिशेत्।
भानुः पूर्वापरश्चन्द्रस्तत्र द्रव्यं विनिर्दिशेत् ॥ १६४ ॥

उदयादिगता [२३९]नाड्यः भग्नाः षष्ट्याप्तशेषके।
दिनेन्दुं [२४०]भुक्तियुक्तेऽसौ भवेत्तत्कालचन्द्रमाः ॥ १६५ ॥

चन्द्रवत साधयेत् सूर्यं नक्षत्रं [२४१]चेष्टकालिकम्।
[२४२]शल्यमभ्युध(द्ध)रेत्काष्ठ लोहाङ्गारकवास्थिकम् ॥ १६६ ॥

निखन्य गृहभूमिं तु शिलान्तं वा [२४३]जलान्तकम्।
शल्यं समुद्धरेद्धीमानित्याह स्मापराजितः ॥ १६७ ॥

---

२३५. पूर्वाषाढय in B
२३६. सूर्ये चन्द्र in E
२३७. समागमे in BDE
२३८. शिल्यं in A
२३९. नाभ्यो in A
२४०. भुक्तेयुक्तो in D भक्तयुक्तो in E
२४१. E gives marginal note परिमाणादिलक्षणम्
२४२. B omits V166 cd and 167ab.
२४३. जलांतिकम् in A

159. *Hastā, Puṣyā, Āśleṣā, Rohiṇī, Śatatāraka* (*Śatabhiṣā*), *Pūrvabhadrā, Uttarabhadrā* - these stars are to be written on the third row.

160. *Uttaraphālgunī, Purvaphālgunī, Pitṛ* (*Maghā, Mūlā*), *Agni* (*Kṛttikā*), *Bharaṇī, Aśvinī,* and *Pauṣna* (*Revatī*) - these seven stars are to be put on the door line.

161-163. Three stars starting from *Aśvinī,* five stars starting from *Ārdrā,* four stars starting from *Pūrvāṣāḍhā, Uttarabhādrapadā* and *Revatī* - these are under the lunar house while others are under the solar house. If the lunar stars come under the Sun, and the Sun is united with the Moon then that place will be devoid of any particles and *Śalya.* It indicates that there is no *Dravyaśalya,* only a small quantity of other particles may be there.

164. If the Sun is in the western direction and the Moon in the East, in that position one can detect *Śalya.* If the Sun is in the Eastern direction and the Moon is in the West there one can indicate (*Vinirdiśet*) the '*Dravya*'.

165. At the time of sunrise, the star of the Nāḍi is to be divided by 60. If the remainder is 17 (*dinendu*) in the daily motion of the planet (*bhuktiyukte*), it will be *candramā* at that time.

166. The position of the Sun and the stars will be counted in the manner of the Moon to get the desired time. Wood, iron, charcoal (*Aṅgāra*), bone, will be counted as *Śalya*.

167. While digging the residential land under the stone or water one should weed out all these. A wise man will uplift the *Śalya,* - so says *Aparājitā.*

ग्रन्थान्तरे-

अधः पुरुष[२४४]मात्रात्तु न शल्यं दोषदं गृहे।
जलान्तकं स्थितं शल्यं प्रासादे दोषदं नृणाम्॥ १६८॥

शल्ये नृपभयं गव्ये हयजे रोगसम्भवः।
मार्जारशल्ये नाशश्च शुनोऽस्थिनि[२४५]कलिर्भवेत्॥ १६९॥

हानिः खरोष्ट्रयोः शल्ये नराङ्गे बालकक्षयः।
छागे वह्निभयं चान्यत्सर्वं शल्यं भयावहम्॥ १७०॥

अङ्गारेषु तथोन्मादं कपालेषु स सम्भ्रमः।
काष्ठशल्ये तु जानीयात् [२४६]पौंशल्यं स्त्रीषु वास्तुवित्॥ १७१॥

इति शल्योद्धारविधिः॥

कम्बिकालक्षणं ज्ञेयं मानार्थं सर्वकर्मणाम्।
विश्वेशोऽपि जगत्स्रष्टुं यां दधार करे पुरा॥ १७२॥

परमाणुभिरष्टाभिस्त्रसरेणुरुदाहृतः।
रेण्वष्टकेन बालाग्रं लिक्षा तैरष्टभिर्मताः॥ १७३॥

लिक्षाभिरष्टभिर्युका ता अष्ट स्याद्यवोदरम्।
अष्टभिः सप्तभिः षड्भिस्तैर्मात्राङ्गुलमंशकः॥ १७४॥

त्रिविधैरङ्गुलैर्हस्तो ज्येष्ठो मध्यश्च कन्यसः।
जिनैकार्धाङ्गुलो दैर्घ्ये ब्यासे पिण्डे क्रमा[२४७]न्मतः॥ १७५॥

धातुवंशमधूकोत्थः खदिराञ्जनचन्दनैः।
तत्र पर्वाष्टकं पुष्पं त्र्यङ्गुले त्र्यङ्गुले भवेत्॥ १७६॥

---

२४४. मात्रां in A
२४५. E gives Footnote २४ अंगु
२४६. पौश्चत्यं in CDE
२४७. -त्ततः in DE

In the other book

168. If the *Śalya* is under one *Puruṣa* measurement it is not regarded as faulty for a house. If a *Śalya* lies beneath the water it is faulty for a palace and human beings .

169 -171. *Śalya* causes fear of the King if it comes from a cow, and if from a horse there is fear of disease. If *Śalya* comes from a cat then there is destruction and if it is from a dog then there will be discord and quarrels. (If the *Śalya* is) from an ass or camel there will be loss, and if it is parts of a human being then there will be loss of child. There is a fear of fire if the *Śalya* comes from a goat, and all other *Śalyas* are formidable (*Bhayāvaha*). From charcoal there is a fear of insanity/ madness, from a skull bone (*Kapāla*) there will be confusion. A man proficient in *Vāstu* knows that *Śalya* from wood brings forth *Paumśalya* in women.

Thus ends the procedure of śalyoddhāra.

172. To measure each and everything one should know the marks of *Kambikā*[9]. To create the world, the lord of the universe held it by hand.

173. One *Tryasareṇu* is made of eight *Paramāṇus.* Eight *Reṇus* make one *Bālāgra* and one *Likṣā* is made of eight *Bālāgras.*

174. *Yukā* is made of eight *Likṣhās* and eight *Yukās* make one *Yava.* By the grouping of 8,7,6(*Yavas*), the division of *Mātrā Aṅgula* and *Aṁśaka* are formed respectively.

175. Three types of finger measurements makes three types of *Hasta*(hands), *Jyeṣṭha* (big) *Madhya*(medium) and *Kanyasa* (small). The *Kambikā* is measured in the following order. 24, 1, and 1/2 *aṅgulas* will be the length, breadth and circumference respectively.

176. The measurement rod may be made of material like, bamboo, *Madhūka, Khadira, Añjana, Candana* trees. There will be eight *Parvas* having flower marks at the interval of every third *Aṅgulas.*

9 *Kambikā* : Join of a bamboo shoot or branch *Kambi-Kuśa.*

रुद्रोऽनिलो विश्वकर्मा वह्निर्ब्रह्मायमोऽम्बुपः ।
धनदो विष्णुरित्यादौ पुष्पेष्वग्रे सुरा नव ॥ १७७ ॥

उच्चाटव्याधि[२४८]सन्तापा वह्निः प्रजाक्षयो मृतिः ।
जलधान्यक्षयौ मोहः फलं तत्पीडने क्रमात् ॥ १७८ ॥

केवलान्यत्र[२४९] पर्वाणि [२५०]चत्वार्यर्काङ्गुलै[२५१]र्भजेत् ।
मध्यात्पञ्चाष्ट सूर्यांशं द्वित्रिवेदांशकैः पुनः ॥ १७९ ॥

मूले पुष्पेषु रेखासु प्रान्ते च त्रिदशाः करे ॥
त्रयोविंशतिराद्यार्धे स धार्यः पुष्पकान्तरे ॥ १८० ॥

[२५२]ईशोऽनिलो विश्वकर्मा वह्नि ब्रह्मा रविः क्रमात् ।
रुद्रो यमो विरूपाक्षो वसवो दिग्गजाम्बुपाः ॥ १८१ ॥

[२५३]स्कन्द इच्छाक्रियाज्ञानी धनेशश्चन्द्रमाजयः ।
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ॥ १८२ ॥

एते देवाः सदैवास्यां कम्बिकायां सुनिश्चलाः ।
आगमैर्वेदमन्त्रैश्च पूज्या सा परमाकला ॥ १८३ ॥

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ॥
इयं हि रुद्रगायत्रीपवित्रीकरणं परम् ।
चतुर्विंशत्यङ्गुलेषु वर्णानेतान् क्रमान्न्यसेत् ॥ १८४ ॥

खेटकं नगरं ग्रामं क्रोशगव्यूतियोजनम् ।
क्षेत्रादिभूमिभागांश्च ज्येष्ठहस्तेन मापयेत् ॥ १८५ ॥

---

२४८. संतापो in A
२४९. वर्षाणि in A
२५०. चत्वार्थंकां
२५१. भवेत् in DE
२५२. similar verse in AP ch 41.V16
२५३. स्कन्दरो in B

177. *Rudra, Anila, Viśvakarmā, Vahni, Brahmā, Yama, Ambupa, Dhanada, Viṣṇu*, these nine gods will be placed in front of *Puṣpa*.

178. If oppressed, there may serially be evil effects of sorcery (*Uccāṭa*), disease(*Vyādhi*), bereavement (*Santāpa*), fire (*Vahni*), loss of subjects (*Prajākṣaya*), death (*Mṛti*), loss of water and grains (*Jaladhānyakṣaya*),and dilution (*Mohaphala*)

179. Here only four *Parvas* are to be distributed within twelve *aṅgulas*. From the middle, the fifth, eighth, twelfth part may again be divided into two, three, four parts.

180. On the main line of the *Puṣpa* and on the border line and on the 13th *aṅgulas* and on the upper half of the 23rd part that should be placed in between *Puṣpaka*.

181-182. Serially the deities are *Īśa, Anila, Visvakarmā, Vahni, Brahmā, Ravi, Rudra, Yama, Virūpākṣa,* eight *Vasus, Diggaja, Ambupa, Skanda, Icchākriyā, Jñānī,* (the learned), *Dhaneśa, Candramā, Jaya, Vāsudeva, Saṅkarṣaṇa, Pradyumna, Aniruddha*

183. These deities are unalterable in the front part of the *Kambikā*, so they are to be worshipped with Tantras and Vedic rites as the best one.

Oṁ, we know the great deity and my obeisance is for *Mahādeva* and may *Rudra* lead us to salvation.

184. This is the purificatory incantation of *Rudragāyatrī*. These letters are to be marked serially in the *Aṅgulas*.

185. *A Kheṭaka* (small village), city, village will be measured in terms of *Krośa, Gavyūti, Yojanas*. Fields and other plots of land are to be measured with *Jyeṣṭhahasta*.

प्रासादप्रतिमालिङ्गं गृहं राजगृहं[२५४] तथा[२५५]।
वापीकूपादिभूखातं मिनुयान्मध्यमेन तु॥ १८६॥

यन्त्रशस्त्रासनं वाद्यं वापी[२५५]कूपेन भाजनम्।
छत्रं शय्यारथादीनि कन्यसेन करेण हि॥ १८७॥

एकविंशाङ्गुलोऽरत्निरत्निर्हस्त एव च।
चतुर्हस्तो धनुर्दण्डो वंशः पञ्चकरः स्मृतः॥ १८८॥

[२५६]गृहादिकर्म[२५७]प्रारम्भे हस्तस्य सुधृतस्य तु।
पतनं न शुभं तस्मा[२५८]त्प्रयतेतास्य धारणे॥ १८९॥

इति कम्बिकालक्षणम्।

करे करगुणे हस्ता अङ्गुलघ्ने करेऽङ्गुलाः।
अङ्गुलेष्वङ्गुलघ्नेषु फलं लब्धं [२५९]जिनैर्हृते॥ १९०॥

व्यासात्रिगुणितो[२६०] वृत्तः परिधिः षष्ठभागयुक्।
व्यासपादे परिधिना गुणिते वृत्तजं फलम्॥ १९१॥

२५४. गृह्वथा in A
२५५. कूपेभ in BCDE
२५६. ग्रहादि in A
२५७. –मारम्भे in A
२५८. प्रयतेत्तस्य in DE
२५९. जनैर्हृते in A
२६०. E writes marginal note व्यासस्य षड्भागः ब्यासैः। in A

186. Temples, idols, *Liṅgas*, houses as well as royal palaces, tanks, wells, and other dugouts are to be measured with medium hand.

187. Mechanical contrivances, weapons, seats, drums, ponds, wells, utensils, umbrellas, beds, chariots are to be measured with small hands (*Kanyasa*).

188. Twenty one *Aṅgulas* make one *Aratni* as well as one *Hasta*. *Dhanu* and *Daṇḍa* will be four hands in measurement and the *Vaṁsa* will be of five hands.

189. At the beginning of the construction, the measuring hand should be counted correctly. If anybody deviates from that, it is inauspicious, so one should be careful to count it accurately.

Thus ends the characteristies of kambikā.

Linear *Hasta* measurement can be obtained by measuring with *Kara* joined by another *Kara*. By measuring *Hasta* with *Kara*, one will get the *Karāṅgula* unit measurement (superficial contents of a figure in *hasta* and *kara*).

190. Multiplying the measurement of one finger (*Aṅgula*) by another finger and dividing the result by 24, one can get the area in *Aṅgula* units[10]

191AB. Three times the diameter of a circle, when added to one sixth part of the same diameter, obtains the circumference of the circle (*Vṛtta*) with respect to diameter [If d is the diameter of a circle, the circumference as given in the *verse* is $3d + d/6 = d(3+1/6) = d(3+0.167) = 3.167d$ say approximately to $3.141d = \pi d$ i.e. the mathematical formula of the circumference of the circle].

191CD. Multiplying the circumference by one fourth part of the diameter, one can get the *Vṛtta phala* (area of the circle).

---

10 Example:- To find the area of the plot, 5 *Kara*, 12 *Aṅgula* by 3 Kara 12 *Aṅgula* .
Solution: 1st Step:- 5 *Kara* X 3 *Kara*= 15(sq.) *Karas*,
2nd Step:- 5 *Karāṅgula* X 12 *Aṅgula* = 1440 (sq.) *Aṅgula*
3 *Kara Aṅgula* X 12 *Aṅgula* = 864 (sq .) *Aṅgula*
12 *Aṅgula* X 12 *Aṅgula* = 144 (sq .) *Aṅgula*
Total = 2448 (sq.) *Aṅgula*
2448÷24=102, 102÷24 =4(sq) *Kara* 6(sq.) *Aṅgula*

गोले व्यासघनस्यार्धस्वैकविंशांशयुक् फलम्।
ज्याशरैक्यार्धं शरघ्नं पुराणांशयुतं धनुः ॥ १९२ ॥

कृत्वा प्राक्सूत्रमर्धाङ्कं दक्षिणोत्तरमत्स्ययोः ।
न्यस्यसूत्रैश्चतुःकोणैरङ्कितं चतुरस्रकम् ॥ १९३ ॥

इष्टबाहुमितैर्भागैर्वृत्तार्धं विभजेत्सुधीः ।
[२६१]षडंशस्यभुजो ह्येवं वृत्तान्तः क्षेत्रसूत्रणम् ॥ १९४ ॥

क्षेत्रार्धं स्वरसांशे [२६२]न षष्ठास्तस्य भुजो भवेत्।
रसांशः स्वरसांशेन युतो बाहुः [२६३]कलास्रके ॥ १९५ ॥

---

२६१. षडंशस्याद्भुजो in B
२६२. नमष्टास्र in BCDE
२६३. कलास्रकं in A

[1/4 d x circumference = $\pi d \times d/4 = \pi d^2/4$ = mathematical formula for the area of a circle.

192ab After getting the measurement of the diameter of the circle, half of the cubic value of the diameter has to be divided into 21 parts. The remaining first half of the cube of the diameter is then to be added to one twenty first part of the previous half. The result of the summation will give the volume of the *Gola*.

[If d is the diameter of the *Gola*, cubic half of the diameter when broken into twenty-one parts and one part is then added to the remaining cubic half of the diameter, this results in a summation as $d^3/2\ (1 + 1/21) = d^3/6(3 + 1/7) = d^3/6(3.142)$ say $\pi d^3/6$ i.e. the mathematical formula for the volume of a sphere]

192cd Add sine (*Jyā*) to verse sine (*Śara*) and half of the summation be multiplied by verse sine again. Adding one eighteenth of it further to itself, the measurement of *dhanu* (part of a circle) would be established.

193. With the above formulae one can draw the east-west as well as the north-south line of the land with the depiction of a fish. A quadrangular square can be drawn with the same formula, by lay- ing on four corners.

194. A wise man will determine half of the circumference of a circle with one's own desired *Hasta* measurement (out of three desired types). One *Bhuja* (base) will be one-sixth of the value of half circumference by *Hasta* measurement; this formula was being used for the measurement of a plot of land.

A six cornered plot of land would have 1/6 of half circumference measured by *Hasta* and added with 1/6 of the other half circumference would give the base of the 6 cornered plot of land in *Bhuja* i.e. 2 *bhuja*.

[Let us take S = the measurement in *Hasta* of half circumference of a circle. *Bhuja* is then = S/6. The base of a six cornered plot of land according to the verse is equal to S/6 + S/6 = 2S/6

स्वस्वमानघ्नयोर्बाह्वोर्योगान्मूलं विकर्णजम् ॥ १९६ ॥

ग्रन्थान्तरे ॥

कर्णतो बाहिके द्वे ये त्र्यंशैकान्यायुगांशका: ।
तत्कर्ण: पञ्चभाग: स्यात्करे युगगुणाङ्गुला: ॥ १९७ ॥

इति मेयविधि: ॥

भूमिं संशोधयित्वा तु पुनर्वास्तु समर्चयेत् ।
क्षेत्रपालान्दिशाधीशान् गणेशग्रहचण्डिका: ॥ १९८ ॥

नैवेद्यै: क्षीरखण्डाज्यै: पक्वान्नैर्विविधैरपि ।
बलिभि: पुष्पधूपैश्च यथाशास्त्रं प्रपूजयेत् ॥ १९९ ॥

which is the mathematical formula of the base of a six cornered plot of land in a circle as 2S = the total circumference of the circle.]

195. For a sixteen cornered plot of land in a circle, the value of the base in *Bhuja* (arc) is available by dividing the base of Six cornered plot by sixteen into six. [Mathematically the base of a sixteen cornered plot of land in a circle as 2S/16 where S is the measurement of half circumference of the circle. [According to the verse, base of the sixteen cornered plot of land = 2S/6 X 6/16=2S/16]. By joining the summation of the measurement of each base, one will get the measurement of *Vikarṇa* (diameter, the diagonal), generating thus the *Mūla* (centre) of the circle.

In other book:

196. Two arms (*Bāhu*) out of a right angle (*Karṇa*) inside a circle joining two ends of a diameter of the circle having measurements of 3 and 4 units will end up with a diameter of 5 units of measurement.

Thus ends the methodology of measurement.

[In a right angle triangle, having two arms of dimensions, 3 units and 4 units will result in $3^2 + 4^2 + 5^2$]*

Thus ends the definition of Kamvikā.

197. Multiply *Kara* (i. e *Hasta*=24 *Aṅgulas*) with *Kara* to get (square) *Kara*; also *Aṅgulas* with *Karā ṅgulas*, and *Aṅgula* by dividing with 24(*Jina*) twice gives the result(of the area of rectangular or square plot).

197. Multiply diameter by 3 and add 1/6 to it to get the circumference of a circular (plot). To find the area of a circular plot, multiply 1/4 of a diameter by the circumference (*Paridhina)*of the circular (plot).

198 - 199. After the purification of the land, once again the *Vāstu* is to be wor- shipped. Lord of the land (*Kṣetrapāla*), the lord of the corners, (*Diśādhīśa*), *Gaṇeśa*, *Grahacaṇḍī*, should be worshipped with offerings of *Kṣīra*, sweets, clarified butter(*Ājya*), various types of cooked food, flowers, incense and according to the rule of *Śāstra*.

* [Note :- These formulae were used to find out the measurement of plots of land, and the formula has been used by the architects of mediaeval days in western India.]

पूर्वाग्न्योरन्तरे पूजां कृत्वा पूर्वं न्यसेच्छिलाम्।
शेषाः प्रदक्षिणाः स्थाप्याः शिलाधो रत्नपञ्चकम्॥ २००॥

गर्गः॥

ततः पुण्याहघोषेण शिलान्यासं प्रकारयेत्।
ऐशानी[२६४]मादितः कृत्वा प्रादक्षिण्यक्रमेण [२६५]च॥ २०१॥

अनेनैव विधानेन स्तम्भद्वाराधिरोहणम्।
शिलान्यासस्तु रोहिण्यां श्रवणे हस्तपुष्ययोः॥ २०२॥

मृगशीर्षं च रेवत्यामुत्तरात्रितये शुभः।
गृहीतवास्तुमध्ये तु समं कृत्वा भुवःस्थलम्॥ २०३॥

जलेन [२६६]दण्डमात्रेण साध्यं तच्चतुरस्रकम्।
भित्तेर्मूले न्यसेद्द्रव्यं रत्न-रौप्य-सुवर्णकम्॥ २०४॥

गृहे तत्र भवेल्लक्ष्मीर्द्रव्य[२६७]हीने दरिद्रता।
लेपहीनाऽधिका भित्तिरशास्त्रा [२६८]पादवर्जिता॥ २०५॥

समसन्धिः शिरोगुर्वी षड्दोषैर्धननाशनम्।
भूमेर्धनाख्यसम्पत्तिं काष्ठादिद्रव्यनिश्चयम्॥ २०६॥

सम्यग्विचिन्त्य हृदये प्रारभेत गृहादिकम्॥ २०७॥

इति श्री सूत्रधारमण्डनविरचिते वास्तुशास्त्रे वास्तुमण्डने मिश्रकाध्यायः प्रथमः। श्लोकाः २०७॥

२६४. मादेतः in A
२६५. तु in BCDE
२६६. नंड in B, मंडमांड C.D,E writes note वंसल, वंशला,
२६७. मूले in BCDE
२६८. वादविवर्जिता in· A

200. At first, there should be worshipping in between the East and South- East (*Agnikoṇa*) corners. Then the stone is to be laid and at the end the owner should go round the site and place five types of gems under the stone.

Garga

201. Then, with the declaration of an auspicious day, the stone laying ceremony is to be done and one should start going round in a circle from the North-East (*Īśa*) corner according to order.

202-203. In the same manner, the pillars and doors are to be mounted. If the stone- laying ceremony(*Śilānyāsa*) is performed in *Rohiṇī*, *Śravaṇā*, *Hastā*, *Puṣyā*, *Mṛgaśīrṣa*, *Revatī*, and the three *Uttarā*[12] stars, it is auspicious. In that plot of land, the soil should be levelled.

It should be done with the help of water and staff (*Daṇḍa*) and the plot should be made square. At the base of the foundation wall, one should keep gems, silver and gold which brings prosperity to the house; otherwise poverty may result.

Inadequate or excessive plastering, the foundation wall not made according to the formula of the *Śāstra*, a structure without any column, whose joints are one over the other in one line, whose upper part is heavy–these six types of defects reduce wealth.

204-207. One should start the construction of the house after carefully taking into account the land, and proportionate wealth, as well as materials like wood-etc.

Thus ends the first chapter Miśrakādhyāya of Vāstumaṇḍana, written by Maṇḍana Sūtradhāra. There are 207 Ślokas.

---

12. *Uttarāsāḍha, Uttara Phalgunī, Uttarabhādrapadā*

द्वितीयोऽध्यायः

[आयाधिकारः]

आयधिष्ण्यव्ययांशानां चन्द्रतारादिजं बलम्।
ज्ञात्वा गृही गृहं कुर्यात्स्त्रीपुत्रादिधनाप्तये ॥ १ ॥

[१]भित्तिमध्ये गृहेष्वायः प्रासादे भित्तिबाह्यतः।
सभासु मध्ये बाह्ये वा स्यान्मध्ये शयनासने ॥ २ ॥

नगरेऽथ पुरे ग्रामे दण्डै[२]र्मानं विधीयते।
[३]वास्तुदण्डमितं क्षेत्रं तत्रायो [४]हस्तसंख्यया ॥ ३ ॥

दैर्घ्येन गुणिते व्यासे ध्वजाद्यायो हृतेऽष्टभिः।
शेषो [५]वास्तुवसात्सोऽपि [६]योज्यो हस्ताङ्गुलैर्यवैः ॥ ४ ॥

ध्वजो धूमोऽथ सिंहश्च श्वानो वृषः खरो गजः।
ध्वांक्ष आया अष्ट तेषां [७]सृष्ट्वा पूर्वादिषु स्थितिः ॥ ५ ॥

सर्वे नरकराः पक्षिचरणाः सिंहकन्धराः।
स्वनामवदनाः [८]धूमो मार्जारः [९]पुरुष ध्वजः ॥ ६ ॥

१. E gives marginal note भीत्यन्तर्गृहे,
२. माने - in D, E
३. वसु - in A
४. E gives marginal note - समक्षेत्रभूमिषु
५. वस्तु - in ABC
६. योगां in A याज्यो in BC
७. वै सृष्ट्वा in A
८. धूम्रो - in D
९. पुरुषो धूनः in A

Chapter II

[Aāyādhikārah̩]

Now is described the command of Āya.

1. One should have proper knowledge about the place of *Āya, Vyaya,* and the power of lunar asterism; then the householder will build a house in order to obtain wife, children and wealth.

2. The *Āya* formula should be counted from the inner part of the foundation wall for a house; it should be counted from the outer part of the foundation wall for a palace. For a hall it is to be counted from inside, as well as from outside, and for beds and seats it should be counted from inside.

3. A city, town or village should be measured with the help of a *Daṇḍa* (rod). A plot of land would be measured with the *Vāstudaṇḍa* and the *Āya* will be counted by the number of hands.

4. The breadth, if multiplied by the length and divided by eight, is known as *Dhvaja* etc. The remainder will be according to the foundation of *Vāstu* and should be added by the hands, finger, *Yava* (1/8th part of an *Aṅgula*).

5. *Dhvaja, Dhūma, Siṁha, Śvā, Vṛṣa, Khara, Gaja, Dhvāṁkṣa,* – these are eight *Āyas,* their position starts from the eastern side of the construction.

6-7. All types of human hands, claws of the bird, necks of lions , faces according to their name. *Dhūma, Mārjāra* (*Dhūma* and cat are on the *S.E* corner) *Puruṣa, Dhvaja* (Eastern direction), very strong

महोत्कटा दिशां नाथाः वसन्त्यन्योन्यसंमुखाः।
पूजिताः पूजयन्त्येते घातयन्त्यपदस्थिताः ॥ ७ ॥

ध्वजः सिंहो [१०]वृषो हस्ती स्वपदे वामदक्षिणे।
कर्णगाः स्वपदे देया आयद्वारे [११]विदिग्गते ॥ ८ ॥

ध्वजसिंहवृषे भास्तु देवतायतने हिताः।
विप्रादिनां क्रमाद्गेहे सर्ववर्णे गजो हितः ॥ ९ ॥

[१२]अधमानां गृहे धूमो श्वान रासभवायसः।
वृषस्थाने गजं दद्यात् सिंहवृषभहस्तिनोः ॥ १० ॥

ध्वजः सर्वेषु दातव्यो नान्यत्र स्वपदाद्वृषः।
नवकोष्ठीकृते भूमिमध्येऽस्याः कुलदेवता ॥ ११ ॥

स्थापयेच्छकुनार्थेषु ध्वजाद्येषु फलं क्रमात्।
अर्थलाभश्च सन्तापो भोगः कलह एव च ॥ १२ ॥

धान्यं स्त्रीदूषणं सौख्यं मरणं च विनिर्दिशेत्।
ध्वजः सर्वमुखः प्रत्यङ्मुखः पूर्वाननो वृषः ॥ १३ ॥

सिंह सौम्यमुखो हस्ती दक्षिणाभिमुखः शुभः।
खण्डितं स्फुटितं दग्धं भिन्नं निपतितं तथा ॥ १४ ॥

तेषां न मन्त्रसंस्कारो गतास्ता आयदेवताः ॥ १५ ॥

देवयज्ञगृहच्छत्रध्वजवेदीषु तोरणे।
वस्त्रालङ्कारदैवेषु दद्यात्तोयाशये ध्वजम् ॥ १६ ॥

होमकुण्डेऽग्निसंस्थाने होमशाला महानसे।
धूमं युज्याद्विशेषेण वह्निकर्मोपजीविनाम् ॥ १७ ॥

---

१० पृष्टो in A
११. विदिग्जजे in A
१२. अधूमानां in B

lords of all directions reside facing one another. If properly placed they bring prosperity, and if placed otherwise they destroy everything.

8. *Dhvaja, Siṁha, Vṛṣa, Hastī* will reside in their own position towards the left and right. The cornered one will be kept in their own place, but if placed otherwise, they are to be brought to their own position.

9. If the stars are in *Dhvaja* (East) *Siṁha* (South) and *Vṛṣa*, it is auspicious for temples. *Gaja* (North) is auspicious for the house of *Vipra* and all other *Varṇas*.

10. For the lower caste people the houses should be in *Dhūma* (*S.E.*) *Śvā* (*S.W*), *Rāsabha* (*N.W*) and *Vāyasa* (*N.E*) direction. *Gaja* can be put in the place of *Vṛṣa* and *Siṁha* and *Vṛṣa* in the place of *Hastī*.

11. *Dhvaja* can be placed everywhere but *Vṛṣa* should not be shifted from its own position. If the chart is drawn for 9x9 squares, the central plot will be reserved for one's tutelary deity (*Kuladevatā*)

He should be consecrated therein for good and bad omens. Now, the results of the *Dhvaja* and others are described serially. They indicate gain of wealth, affliction (*Santāpa*), enjoyment, as well as quarrel, grains, fault of women, friendship and death.

12-13. *Dhvaja,* can face all directions as well as westwards, *Vṛṣa* stands in the eastern direction.

14-15. It is auspicious if *Siṁha* faces towards the North and *Hastī* faces the South. If the directions are violated then there will be explosions, burns, separation as well as falls. They do not have any consecration of *Mantras* and *Āyadeva* is lost therein.

16. *Dhvaja* can be placed in sacrifice for God's, houses, umbrellas, flags, altars, gates, divine clothing, ornaments and water reservoirs.

17. *Dhūma* is suitable for the sacrificial pit, fireplace, sacrificial hall, kitchen, and especially for the houses of people who work with fire.

सिंहासने शुभः सिंहः सिंहद्वारे नृपालये।
यन्त्रे युद्धगृहे शस्त्रे कवचे बन्धनालये॥ १८॥

श्वानोपजीविनां [१३]स्थाने वेश्याम्लेच्छांत्यजालये।
भण्डमातङ्ग[१४]चण्डाल[१५]मलस्थानेषु शस्यते॥ १९॥

वृषो हट्टेषु संयोज्यो धान्यभोजनमन्दिरे।
वणिग्गृहेऽश्वशालायां भाजने भोजनस्य च॥ २०॥

चतुर्विधेषु वाद्येषु नट[१६]प्रेरणकादिषु।
वेश्याकुलालरजके खरस्तज्जीविनां हितः॥ २१॥

गजं दद्यात् गजस्थाने तत्र सिंहं तु वर्जयेत्।
[१७]राजक्रीडास्पदारामराजपत्नीनिकेतने॥ २२॥

आसने शयने याने गजो योज्योऽङ्गनागृहे।
ध्वांक्षो न शोभनोऽप्यायः कम्बिकायां शुभो मतः॥ २३॥

मठशिल्पपतिस्थाने [१८]शस्यते पक्षिणां गृहे।
मूर्तौ लिङ्गे ध्वजे छत्रे दैर्घ्य आयादिकल्पना॥ २४॥

[१९]विस्तारायामगणना तामन्यत्र प्रकल्पयेत्।
रुद्रभागायते चक्रे कृते पञ्चाशविस्तरे॥ २५॥

ऊर्ध्वपंक्तौ क्रमात् कोष्ठेष्विन्द्रे(१४) धिष्ण्य(२७) द्वि(२)भास्करान्।
तिथ्य(१४)ष्ट(८) वेद(४) रामे(३) षू राग(६) नन्दा(९)न्समालिखेत्॥२६॥

१३. श्वानो – in B
१४. चांडाल – C, D, E
१५. DE give note खातागाड
१६. प्रेक्ष – in C
१७. E gives note राजगद्दी
१८. दास्यते – in A
१९. A omits V 25 ab.

18. *Siṁha* is auspicious for a royal throne, main doors, kingés palaces, machineries, battle houses, weapons, armour, and prisons.

19. *Śvā* (South-West) is suitable for the houses of working class people, prostitutes, *Mlecchas,* untouchables, hypocrites, the place for elephants, *Caṇḍālas* and toilets.

20. *Vṛṣa* (West) is appropriate for markets, granary, and dining places, houses of the businessmen, stables, *Bhājana*[1] of eating places.

21. Among four types of musical instruments, actors and directors, for the prostitutes, potters, and washermen, *Khara* (N.W) is suitable for those following these occupations.

22-23a. *Gaja* should be placed on the North, and *Siṁha* (South) is to be dis- carded there. In the pleasure garden for a kingés sport, in the house of a kingés wife, seats, beds, transports, and for the house of women *Gaja* should be added.

23b-24. Though *Dhvāṁkṣa* (N.E) is not beneficial but *Āya* is regarded as auspicious for *Kambikā* (measurement). It is appropriate for a monastery business house and in the aviary. Length of the statue, phallus, flag, umbrella, can be measured with the help of *Āya* .

25. In other places, the calculation of length and breadth should be fixed. A plan of 11 divisions in length and 50 division in breadth is to be drawn.

26. In the upper chambers serially the members - 14, 27, 2, 12, 14, 8, 4, 3, 5, 6, 9 should be written.

१४	२७	२	१२	१४	८	४	३	५	६	९
अ	आ	इ	ई	उ	ऊ	ए	ऐ	ओ	औ	क
ख	ग	घ	ङ	च	छ	ज	झ	ञ	ट	ठ
ड	ढ	ण	त	थ	द	ध	न	प	फ	ब
भ	म	य	र	ल	व	श	ष	स	ह	क्ष

1. This moulding called *Bhājana* is treated as the topmost or crowning moulding of pedestals and basement. It is rectangular in form.

तदधो मातृकावर्णानका[२०]राद्यान् समालिखेत्।
ऋ ॠ लृ ॡ विसर्गान्तः संयोगाक्षरवर्जितान्॥ २७॥

नामाक्षराङ्कसन्धातान् वसुभिर्विभजेत्सुधीः।
शेषमायो मनुष्यस्य ध्वजाद्यो गेहगो भवेत्॥ २८॥

नक्षत्रं तारकां शौचव्ययाद्यं चापि गेहगम्।
ध्वजादीनां चतुर्णां तु चत्वारो वृषभादयः॥ २९॥

भक्ष्यास्ते भवने वर्ज्या गृहस्वाम्यायभक्षकाः॥ ३०॥

इति आयाधिकारः॥

[२१]गणनाद्विस्तरायात्पौर्यदैक्यं तत्फलं पुनः।
तस्मिन्नष्टगुणे धिष्ण्यैर्भक्ते शेषं तु भं भवेत्॥ ३१॥

नक्षत्रं त्रिविधं दैवं मानुषं राक्षसं तथा।
राक्षसं मृत्युदं गेहे नक्षत्रं योनिवैरवत्॥ ३२॥

Graph from MsD

ग देव	पु	ह	अ	मृ	अ	रे	श्र	स्वा	पु.	
ग मानुष	से	भ	आ	पू	पू	पु	उ	उ	उ	
ग राक्षस	म	मु	चि	ज्ये	श्ले	ध	कृ	स	चि	

Graph from Ms E

पु	ह	अ	मृ	अ	रे	श्र	स्वा	पु			देव
रो	भ	आ	पू	चू	पू	उ	उ	उ			मनुष्य
म	यू	वि	ज्ये	रले	ध	कृ	श	चि			राक्षस

Graph from Ms E

अ	छा	कृ	रो	मृ	आ	पु	पु	श्ले	म	पू	उ	ह
अश्व	गज	छाग	सर्प	सर्प	श्वान	मार्जार	छाग	मार्जार	मुष	क	गौः	महिष

चि	अ	ज्ये	भु	पू	उ	अ	अ	ध	श	पू	पु	उ	रे
व्याघ्र	मृग	मृग	श्वान	वानर	नकु	ल	वानर	सिंह	अश्व	सिंह	गौ	ग-	ज

२०. आद्यान् क्षतान् समा - - in B
२१. गुणना - in B

27. Under these numbers 'A' and other *Mātṛkā, Varṇas* are to be written, but Ṛ, long Ṛ, Li, long Li, *Visarga* and joint words are to be avoided.

28. The alphabets in the name are to be divided by eight. Rest is the *āya* of man and becomes *gehaga* due to *dhvaja*.

29-30. Four types of *Vṛṣabha* etc. belong to four types of *dhvajas* etc. These stars and planets are also known as *gehagas* due to *śauca* and *vyaya*. These in buildings ate called *bhakṣyas* as they eat away into the *āya* of the owner and hence they are to be discarded.

31. Again, to get the result from the *Āya,* multiply the length by eight and then it is to be divided by the lunar constellation (27); the remainder is called *Nakṣatra*.

32. *Nakṣatras* are of three types, Divine (*Daiva*), human (*Mānuṣa*) and *Rākṣasa*. *Rākṣasa* brings destruction to a house, like the enmity of *Yoni* pertaining to *Nakṣatras*.

नवदेवगणः पुष्यो हस्तो मैत्रमृगोऽश्विनी।
रेवती श्रवणः स्वाती पुनर्वसुरपि स्मृतः॥ ३३॥

रोहिणी भरणी चार्द्रा तथा पूर्वोत्तरात्रयम्।
मानुषाणि नवैतानि राक्षसैः सह मृत्यवे॥ ३४॥

मघामूलं विशाखा च ज्येष्ठाश्लेषाधनिष्ठिकाः।
कृत्तिका शतभं चित्रा नवमी राक्षसो गणः॥ ३५॥

स्वकुले चोत्तमाप्रीतिर्मध्यमा देवमानुषे।
देवराक्षसयोर्वैरं मृत्युर्मानवरक्षसोः॥ ३६॥

अश्वोऽश्विनी शतभयोर्भरणीपौष्णयोर्गजः।
कृत्तिकापुष्ययोः छागो रोहिणी मृगयोरहिः॥ ३७॥

श्वानोमूलार्द्रयोर्योनिः सर्पादित्ये बिडालकः।
पूर्वफा मघयोराखुरुफो (प)त्तरभयोस्तु गौः॥ ३८॥

हस्तस्वात्योस्तु महिषी व्याघ्रश्चित्राविशाखयोः।
ज्येष्ठानुराधयोरेणः पूषाढाश्रवणे कपिः॥ ३९॥

उषाढाभिजितोर्बभ्रुः सिंहः [२२]पूभाधानिष्ठयोः।
मेषमर्कटयोर्वैरं गोव्याघ्रगजसिंहयोः॥ ४०॥

श्वानैणं सर्पनकुलं बिडालोन्दुरुकं महत्।
महिषाश्वमिति त्याज्यं भृत्यस्त्रीप्रभुवेश्मसु॥ ४१॥

इति नक्षत्राधिकारः।।

नक्षत्रे वसुभिर्भक्ते यच्छेषं स व्ययो भवेत्।
आयाद्धीनः स पक्षाख्यो धनधान्यकरः स्मृतः॥ ४२॥

---

२२. पूजा - in A

33. *Puṣyā, Hastā, Maitra, Mṛgaśirā, Aśvinī, Revatī, Śravaṇā, Svātī, Punarvasu* - these nine belong to the divine group.

34. *Rohiṇī, Bharaṇī, Ārdrā* as well as three *Pūrvas* (*Pūrvāṣāḍhā Pūrvaphālgunī, Pūrvabhādrapadā*) three *Uttaras* (*Uttarāṣāḍhā, Uttaraphalgunī, Uttarabhādrapadā*) - these nine belong to the human group and if combined with *Rākṣasas*, they cause death.

35. *Maghā, Mūlā, Viśākhā, Jyeṣṭhā, Aśleṣā, Dhaniṣṭhikā, Kṛttikā, Śatabhiṣā, Citrā* - these nine belong to the *Rākṣasa* variety.

36. These are best matched if it is from the same class. The combination of Divine and Human class is of medium character. The combination between Divine and *Rākṣasas* causes hostility and the combination between the human and *Rākṣas* variety causes death.

37. According to the principle of origin, *Aśvinī* and *Śatabhiṣā* belong to the group of horse; likewise the elephant for *Bharaṇī* and *Pauṣna* (*Revatī*), goat for *Kṛttikā* and *Puṣyā*, snake (*Ahi*) for *Rohiṇī* and *Mṛga*.

(Śvā) dog for *Mūlā* and *Ārdrā*, cat for *Sarpa and Āditya, rat* (*Ākhu*) for *Pūrvaphālgunī* and *Maghā*, cow for two *Uttarās* (*Uttaraphālgunī* and *Uttarabhādrapadā*), buffalo (*Mahiṣī*) for *Hastā* and *Śvātī*, tiger for *Citrā* and *Viśākhā*, black antelope (*Eṇa*) for *Jyeṣṭhā* and *Anurādhā*, monkey (*Kapi*) for *Pūrvāṣāḍhā*, and *Śravaṇā* mongoose (*Babhru*) for *Uttaraṣāḍhā* and *Abhijit*, lion (*Siṁha)* for *Pūrvabhādrapadā* and *Dhaniṣṭhā*.

38-40. There is enmity between *Meṣa* (sheep) and *Markaṭa* (monkey) *Go* (cow) and *Vyāghra* (tiger), *Gaja* (elephant) and *Siṁha* (lion).

41. *Śvā* (Dog) and *Eṇa*(black antelope), *Sarpa* (snake) and *Nakula* (mongoose) *Viḍāla* (cat) and *Indura* (rat), *Mahiṣa* (buffalo) and *Aśva* (Horse) are to be discarded up in the buildings of servant, wife and master.

Thus ends the command of constellation of the stars.

42. If the constellation of the stars is to be divided by 8, the remainder is known as *Vyaya*. If it is less than *Āya* and congenial, it is known to usher grain and wealth.

आयतुल्यं पिशाचः स्यादायाधिकस्तु राक्षसः।
[२३]चिन्तात्मको व्ययः प्राज्ञैरष्टस्वायेषु वर्जितः॥ ४३॥

शान्तोऽथ पौरः प्रद्योतः श्रियानन्दो मनोहरः।
श्रीवत्सो विभवश्चैव [२४]चिन्तात्मको व्ययाष्टकम्॥ ४४॥

ध्वजे शान्तः शुभो गेहे नित्यं कल्याणकारकः।
भोगपूजाबलिर्नृत्यगीतवाद्यं सुरालये॥ ४५॥

इति [२५]व्ययाः॥

मूले व्ययान्विते वेश्म नामाक्षरविमिश्रिते।
त्रिभिर्भक्ते भवेदंश शेष इन्द्रो यमो नृपः॥ ४६॥

प्रासादप्रतिमालिङ्गे वेद्यामिन्द्रो ध्वजो हितः।
सर्वत्र शोभनो राजा पुरराजगृहादिषु॥ ४७॥

यमो मातृगणेशादि मद्यमांसादिविक्रये।
भैरवे क्रूरदेवे च हितो मृत्युकरो गृहे॥ ४८॥

इत्यंशकाः॥

[२६]गणयेत्स्वामिनक्षत्रात् यावदृक्षं गृहस्य च।
नवभिस्तु हरेद्भागं शेषा तारा प्रकीर्तिताः॥ ४९॥

शान्ता मनोहरा क्रूरा विजया कलहावहा।
पद्मिनी राक्षसी वीरा आनन्दा नवमी स्मृताः॥ ५०॥

तृतीया विपदं कुर्यात्पञ्चमी तेजसः क्षयम्।
सप्तमी धननाशं च तेन तारात्रयं त्यजेत्॥ ५१॥

इति तारा॥

२३. चित्रा - in B
२४. चिन्तात्मेति - in B, C, D, E
२५. क्षेत्रफलम् in E
२६. Similar verses in Aparājitā pṛchhā ch 66 v 32-33

43. If *Āya* and *Vyaya* are the same it is known as *Piśāca* and if it (*Vyaya*) is more than *Āya* it is known as *Rākṣasa*. The variety of *Vyaya* designated as *Cintātmaka* is to be discarded among eight types of *āya*.

44. The eight types of *Vyaya* are *Śānta, Paura, Pradyota, Śriyānanda, Manohara, Śrīvatsa, Vibhava* and *Chintātmaka*.

45. *Śānta* in *Dhvaja* is always beneficial in a house. There will be enjoy- ment prayer oblation, dance, song and instrumental music if the same com- bination happens to be in a temple.

Thus ends the Vyaya.

46. In the source connected to *Vyaya*, an addition is to be done with the letters of the name of the house. They are to be divided by three, and known as *Aṁśa*. The remainder is *Indra, Yama* and *Nṛpa*.

47. *Indra* and *Dhvaja* are auspicious for a palace, idol and phallus. *Rāja* is always good for a city and a royal palace.

48. *Yama* brings in death for a house but is auspicious for Mother (*Tantra*) *Gaṇeśa*, and others selling wine and meat, *Bhairava* and other cruel *Devas*.

Thus ends the Aṁśaka.

49. From the star of the owner, count the number of the presiding star of the house, then divide it by nine, the remainder is called *Tārā*.

50. *Śāntā, Manoharā, Krūrā, Vijayā, Kalahāvahā, Padminī, Rākṣasī, Vīrā, Ānandā* - these are the nine varieties .

51. The third one causes danger while fifth one reduces strength, the seventh one causes loss of wealth, so these three stars should be discarded.

Thus ends Tārā .

ईशानात्कृत्तिकादीनि सप्त सप्त प्रदक्षिणे।
धिष्ण्यानि यत्र गेहर्क्षं ज्ञेयस्तत्रैव चन्द्रमाः ॥ ५२ ॥

अग्रतः स हरेदायुः पृष्ठतस्तु धनं हरेत्।
वामदक्षिणतश्चन्द्रो धनधान्यकरो गृहे ॥ ५३ ॥

इति चन्द्रः ॥

प्रीतिस्तु षड्विधाः तासामुत्तमा समसप्तमी।
तृतीयैकादशी वृद्धयै पुष्ट्यै दशचतुर्थिका ॥ ५४ ॥

[२७]षड्वाष्टकम् त्रिकोणञ्च गृहं द्विद्वादशं त्यजेत्।
मरणं कलहो हानिस्तस्मात्प्रीतित्रयं त्यजेत् ॥ ५५ ॥

राशेर्मैत्री हरेद्वैरं [२८]ग्रहजं ग्रहजा पुनः।
मैत्री राशेर्विरुद्धत्वं नाडिवेधं त्यजेत्सदा ॥ ५६ ॥

विप्र-क्षत्रिय-विटशूद्रा मीनाद्या राशयः क्रमात्।
स्वामिनोऽधिकवर्णं हि गृहं सौख्यकरं न हि ॥ ५७ ॥

ब्राह्मणे सकला राज्ञि प्रशस्ता [२९]नवराशयः।
षठ् वैश्येऽथ त्रयः शूद्रे स्वामिराशेः क्रमोऽप्ययम् ॥ ५८ ॥

गृहस्थः गृहयोः स्वामिवैरं मैत्रीं विलोकयेत्।
दुष्टे प्रीतिर्विलोक्या सा सुप्रीतौ तां न चिन्तयेत् ॥ ५९ ॥

षष्ठिघ्नं भवनस्य र्क्षं पञ्चत्रितनुभिर्भजेत्।
शेषे मेषादिको राशिः प्रोक्तः कैश्चिन्नवांशके (कैः ?) ॥ ६० ॥

अश्विन्याद्यं त्रिकं मेषे सिंहे ज्ञेयम् मघात्रयम्।
मूलादित्रितयं चाये शेषाणि नवराशिषु ॥ ६१ ॥

इति राशिमैत्री ॥

२७. षट्का In B, D, E षद्धा In C
२८. गृहजं In A
२९. E gives note - ५ ।६ ।७ ।९ ।१० ।१२ ।१ ।२ ।३ ।६ ।२ । १० ।७ ।९ ।३ ।३ ।७ ।१२

52-53. From the North-East corner *Krittikā* and the other seven stars circu- mambulate seven houses; the part of the house where it settles is known as the house of the Moon. If placed in front, it causes loss of longevity, if placed at the back it causes loss of wealth. For a house, if placed on the left or right side, it increases wealth and prosperity.

Thus ends Candra.

54. *Prītiyoga* is of six types. Among them the best one is *Samasaptamī. Tṛtīyā* and *Ekādasī* are known by *Vṛddhā and Daśamī, Caturthī as Puṣyā.*

55. In the chart of a house one should avoid *Ṣaḍāṣṭaka, Trikoṇa* and *Dvi-dvādaśa*. Death, quarrels and loss will occur from those combinations. So, these three *Prītiyogas* should be avoided.

56. If there is parity among the zodiac signs then there will be no enmity; again the vices arising from the combination of planets are removed by the planets themselves. One should not go against the favourable zodiac sign and should avoid *Nāḍīvedha.*

57. Brahmins, *Kṣatriya, Vaiśya, Śūdra* occupy Pisces and three other zodiac signs. In a house where the *Varṇas* are higher than the *Varṇa* of the house-owner, then it is not regarded as congenial.

58. All zodiac signs are auspicious for Brahmins. Nine zodiac signs for King, six for *Vaiśyas,* and three for *Śūdras*- these are the orders of the lordship of the zodiac signs.

59. A householder will count the zodiac signs of the house and the signs of the householder and consider the enmity or *Maitrī.* If it does not match, then one should consider *Prīti.* In case *Prīti* is favourable then other factors are to be ignored.

60. The sixth place in the chart of the house destroys its star. The fifth and third zodiacs are to be considered with the *Lagna* and others are of the opinion that the *Meṣa* and other zodiacs come at the end with *Navāṁśa* .

61. *Aśvinī* group of triple stars belong to Aries (*Meṣa*), *Maghā* group of three belong to Leo (*Siṁha*), *Mūla* group of three belong to Sagittarius (*Dhanu*) and rest belong to the (other) nine zodiac signs.

Thus ends the amity of the zodiac signs

[३०]सिंहस्याधिपतिः सूर्यश्चन्द्रमाः कर्कटाधिपः।
मेषवृश्चिकयोर्भौमः कन्यामिथुनयोर्बुधः॥ ६२॥

धनुर्मीनपति[३१]र्जीवः शुक्रो वृषतुलाधिपः।
शनिर्मकरकुम्भेशः कन्या राहुगृहं भवेत्॥ ६३॥

चन्द्रार्कभौमजीवाश्च शुक्रज्ञशनिराहवः।
चत्वारोऽन्योन्यमित्राणि शत्रवस्ते परस्परम्॥ ६४॥

रविमन्दे भवेद्वैरं तथैव कूजमन्दयोः।
सोमस्य सूर्यपुत्रस्य महद्वैरं परस्परम्॥ ६५॥

इति ग्रहमैत्री॥

भवनस्योदयं क्षेत्रफलेन गणयेत्सुधीः।
वसुभिर्विभजेच्छेषोऽधिपतिः ससमः शुभः॥ ६६॥

यद्वा [३२]व्ययाय संयोगे यदैक्यं वसुभिर्भजेत्।
शेषस्त्वधिपतिः कैश्चिद्विषमः स भयावहः॥ ६७॥

विकृतः कर्णकश्चैव धूम्रदो वितथेश्वरः।
बिडालो दुन्दुभिश्चैव दन्तः कान्तोऽधिनायकाः॥ ६८॥
इति अधिनायकाः॥

फलमष्टगुणं कृत्वा षष्ट्या भक्तेऽवशिष्टकम्।
पञ्चभिर्विभजेच्छेषं तत्वं स्यात्पार्थिवादिकम्॥ ६९॥

पृथिव्यापोऽनलो वायुराकाशमिति पञ्चभिः।
गृहस्यायुषि सम्पूर्णे विनाशो भवति ध्रुवम्॥ ७०॥

३०. Similar verses in Aparājita pṛchhā ch 65 v. 26.
३१. जीवि in B
३२. भयाम – in D, E

62. The Sun is the lord of Leo, Moon is the lord of Cancer. Mars is the lord of Aries and Scorpio, Mercury is the lord of Virgo and Gemini.

63. Jupiter (*Jīva*) is the lord of Sagittarius and Pisces. Venus is the ruler of Taurus and Libra. Saturn is the lord of Capricorn and Aquarius, Virgo is in the house of *Rāhu.*

64. Moon, Sun Mars, Jupiter and Venus, Mercury, Saturn, Rahu-they are friendly with each other, but the first four have enmity with the last four[2].

65. There is enmity between Sun and Saturn and likewise between Mars and Saturn. Moon and Saturn have great enmity with each other.

Thus ends the amity of the planets.

66. The height of a house will be multiplied by the perimeter of the plot. The measured number will be divided by 8 and the remainder will be the lord of the house. It is regarded as auspicious if it is *Sama* (even).

67. Or with the addition of the *Vyaya,* the total number is divided by 8 (*Vasu*), the remainder will be the lord. If it is *Viṣama* (uneven), it is dangerous.

68. *Vikṛta, Karṇaka, Dhūmrada, Vitatheśvara, Viḍāla, Dundubhi, Danta, Kānta* are the lord of the house.

Thus ends the topic of the lord of the house.

69. Multiply the perimeter of the land by 8, and then divide it by 6, the remainder will again be divided by 5. The residue is the fact of the primary element, starting from Earth.

70. After completion of the duration of the house, it certainly gets destructed by the five elements- earth, water, fire, air and sky.

---

2. Enemy: Sun-Venus, Saturn Mars-Mercury Mercury-Moon Jupiter-Mercury, Venus Venus- Sun, Moon Saturn -Sun, Moon, Mars Rahu- Sun, Moon, Mars Ketu- Venus, Saturn.

जीर्णं [३३]भवति भूतत्वे तोयाग्न्योस्तद्भवं भयम्।
वायौ रोगस्तथाकाशे शून्यतामेति मन्दिरम्॥ ७१ ॥
इति पञ्चतत्वानि॥

प्रभुः पण्याङ्गना मित्रं देशो ग्रामः पुरं गृहम्।
नाडि[३४]वेधमतं श्रेष्ठं शुभं वेधविवर्जितम्॥ ७२ ॥

एकनाडिगता यत्र गुरूमन्त्राश्च देवताः।
तत्रोद्वेगं रुजं मृत्युं क्रमेण फलमादिशेत्॥ ७३ ॥

सेव्यसेवकयोश्चैव गृहं तत्स्वामिनोरपि।
परस्परं मित्रयोश्च एकनाडिः प्रशस्यते॥ ७४ ॥

आद्यांशेन तुरीये स्याद्द्वितीयेन तृतीयके।
तृतीयेन द्वितीये च चतुर्थेनादिमे वेधः॥ ७५ ॥

इति नाडीवेधविधिः॥

आयर्क्ष व्यय तारांशाधिपं क्षेत्रफले क्षिपेत्।
अर्के भक्ते भवेल्लग्नमथ लग्नेऽष्टसंगुणे॥ ७६ ॥

हृते शरैकैः शेषं तु तिथिर्नाम समं फलम्।
तिथौ नवघ्ने वारः स्यादर्काद्यो मुनिभिर्हृते॥ ७७ ॥

इति लग्नतिथिवाराः॥

सुपर्ण ओतुः सिंहः श्वा सर्पाखुमृगमेढकाः।
वर्गाधिपः क्रमादष्टौ भक्ष्यो यः पञ्चमो मतः॥ ७८ ॥

इति वर्गप्रीतिः॥

३३. पतति – A, B, D, E
३४. तदद्दितं – in B C, तदादितं – in D, तददितं – in E

71. After the destruction of the earthy elements, there is a fear from water, fire, and disease from air as well as from the sky and the abode becomes desolate.

Thus ends the theory of five elements

72. The owner of the house, commodities, women or (prostitute), friends, country, village, city and houses - for them it is best to consider the theory of *nāḍivedha*, as it is auspicious and to be without any obstruction.

73. Where there is one period of time, and the lord is *Gurumantra*, serially the result of anxiety, pain, and death are in order.

74. The same period of time is praiseworthy for a master, his dependent, as well as for the landlord and mutual friends.

75. There may be obstruction by the first part to the fourth part, by the second to the third, by the third to the second and by the fourth to the first part.

Thus ends the rule of Nāḍivedha.

76-77. *Āya*[3] *Ṛkṣa, Vyaya, Tārā, Aṁśa, Adhipa*, their numbers are to be added to find out the area of a land. By dividing this number by twelve, the reminder will be the *Lagna*, then the *Lagna* is to be multiplied with eight and divided by eight. The remainder will be *Tithi* and the result will be synonymous with their name. If the *Tithi* is multiplied by nine and divided by seven, then the *Vāra* starting from Sunday is available.

Thus ends Lagna Tithi and Vāra.

78. *Suparṇa*[4] (*Garuḍa*), *Otu* (Cat), *Siṁha* (Lion), *Śvā* (Dog), *Sarpa* (Snake), *Ākhu* (Rat), *Mṛga* (Deer), *Meḍha* (Ram), these eight are serially the lords of their place but they are enemies of their fifth place.

Thus ends the amity of Varga.

---

3. *Ṣaḍvarga*-a group of six formula or proportions, six main component parts of a building, *Adhiṣṭhāna* (base), *Pada* or *Stambha* (column), *Prastara* (entablature), *Karṇa* (ear), *Śikhara* (spire), and *Stupi* (dome) According to *Mānasāra* the *Āyādi Ṣaḍ varga* represents a set of six formulas with which any particular measurement must conform before it can be accepted.
4. *Suparṇa* -enemy to *Sarpa*, its 5th house, *otu* to *Ākhu* likewise.

स्ववर्गं परवर्गं च क्रमेण क्रमतो लिखेत्।
एकवर्गे च वर्गाङ्कमष्टभिर्भाजिते स्थितम्॥ ७९॥

[३५]तदर्धे तं विंशोपाः स्युर्देयास्ते प्रथमेन हि।
स्व सम्बन्धे गृहे ग्रामे लाभालाभे विचिन्तयेत्॥ ८०॥

इति विंशोपाः॥

मयस्य च मतांद्वारतिथ्यानयनमुच्यते।
[३६]दैर्घ्यैकघ्ने पृथग्भागैः सप्तभिस्त्रिंशता हृते॥ ८१॥

शेषाः सूर्यादयो वारास्तिथयो युग्मपक्षजाः।
भौमार्कौ च तिथी रिक्ता यमो[३७]त्पातौ मृतिं त्यजेत्॥ ८२॥

आयादिकल्पना सप्तदशाङ्गे सर्वसौख्यदा।
सा तु प्राज्ञैर्विना नाल्पैर्दिवसैर्युज्यते गृहे॥ ८३॥

[३८]ततस्त्रिपञ्चसप्ताङ्कैरङ्गैः कार्यं गृहं बुधैः।
श्रीविश्वकर्मणाप्युक्तं हीनदोषं गुणाधिकम्॥ ८४॥

आयार्क्षव्ययतारांशेन्दुशशिग्रहं सौहृदम्।
आयुस्तैस्त्रिशराद्यंकैः फलमङ्गैः यथोत्तरम्॥ ८५॥

इति सूत्रधारमण्डनविरचिते वास्तुमण्डने वास्तुशास्त्रे आयाधिकारो द्वितीयोऽध्यायः॥

३५. नाडिविद्धं मतं श्रेष्ठं न शुभं वैद्यवर्जितम् – in B
३६. दैर्घ्यं कुघ्नं In D, E
३७. सान्तं in B, त्पातं in CDE
३८. एतात्रिपञ्च – In D, E

79-80. One should draw oneés own *Varga* and other *Vargas* serially. In one *Varga*, the sum of the *Varga* divided by eight remains static. On the half part of that, *Vimśopā* is to be placed at first. It should be considered for their own sake, house, village, in gain and loss.

Thus ends Vimśopā.

81-82. According to Maya it is said to bring or (consider) *Vāra* and *Tithi*, separately. The height or length(?) is to be multiplied by seven and then take away thirty; the remainder is the *Vāra* and *Tithis* at the time of sun rise in both the *Pakṣas*. *Bhauma* (Tuesday), *Arka* days (Sunday) and *Rikta*, *Yama*, *Utpāta*, *Mṛti Yogas* are to be discarded.

83. *Āya* and other plans give happiness in all respects if they are made of seventeenth parts. Without a learned person this plan cannot be applied in a house within a short time.

84. So a wise person will plan his house by three, five, seven, nine parts; it is said by Śrī Viśvakarmā that faults should be less and good qualities should be more.

85. There will be amity among *Āya*, *Rkṣa*, *Vyaya*, *Tārā*, *Amśa*, moon, zodiac signs and planets. Life span will be determined by three, five, nine and results will accordingly follow.

Thus ends the Second Chapter titled Command of Āya, in the Vāstumaṇḍana, the Science of Architecture, written by Sūtradhāra Maṇḍana.

तृतीयोऽध्यायः

[दुर्गादिलक्षणम्]

बलिनाल्पबलेनापि दुर्गं कार्यं महीभुजा।
रक्षणार्थं हि लोकानां तस्मात्पुण्यं महत्तरम्॥ १॥

जलदेव[१]गृहारामतीर्थदानव्रतादिभिः।
यत्पुण्यमाप्नुयाद्राजा दुर्गे दुर्गं करोति यः॥ २॥

अन्यवास्तुस्थितं भित्वा कुर्याद्दुर्गं दृढोन्नतम्।
तत्राखिलानामाधारोऽन्यथा वित्तायुषोः क्षयः॥ ३॥

सिंहोऽपि सर्वसत्त्वानां बलवान् गिरिगह्वरे।
स्थितिं कृत्वा जयत्याशु वैरिवर्गं सुदारुणम्॥ ४॥

गजानां तु सहस्रेण न च लक्षेण वाजिनाम्।
यत्कृत्यं साध्यते राज्ञां दुर्गेणैकेन सिध्यति॥ ५॥

शतमेकोऽपि संधत्ते प्राकारस्थो धनुर्धरः।
तस्माद्दुर्गं प्रशंसन्ति नीतिशास्त्रविचक्षणाः॥ ६॥

शिलादिभिस्तु प्राकारो विशालः प्रोन्नतो दृढः।
शुद्धेष्टकाभिः कर्त्तव्यः परेषां दुर्गमो यथा॥ ७॥

प्राकारे कोष्ठका वृताः विद्याधर्यो युगास्रकाः।
तन्मध्ये बाहिका बाह्ये कपिशीर्षैरलङ्कृताः॥ ८॥

दशार्कमनुहस्तैश्च विद्याधर्योऽपि कोष्ठकाः।
तन्मध्ये बाहिका दैर्घ्ये [२]त्रिगुणा कोष्ठतो भवेत्॥ ९॥

---

१. ग्रहा - In A
२. त्रिकोणा – In B, C, D, E

Chapter III

[Durgādilakṣaṇam]

Now the characteristics of the forts are being described.

1. A king, whether he is powerful or weak , should construct a fort for the protection of his subjects and by this act he will attain great merit.
2. If a king builds the fort, he attains equal merit as is achieved by one who constructs water-reservoirs, temples, pleasure-gardens, holy spots bestows wealth and performs various *Vratas* .
3. Even after demolishing other residences, a fort[1] should be built high and strong, and after that all the people should be accommodated in that fort, otherwise there will be loss of wealth and life.
4. A lion is the strongest of all animals when he lives in his own mountain cave; likewise one can win over one's notorious enemies easily (if he resides in a well constructed fort).
5. Thousands of elephants and Lakhs of horses cannot perform for a King what a fort alone can fulfill.
6. An archer standing on a rampart of a fort can fight with hundreds of people, so the experts in political science eulogize the utility of the fort.
7. The rampart (of a fort) should be huge, lofty and sturdy; it should be built of stone or pure bricks, so that it cannot be easily accessible by others .
8. The ramparts should be adorned with *Koṣṭha*, and on the four sides of the ramparts four chambers are to be constructed; therein idols of *Vidyādharīs* should be installed. Outside the chambers, *Bāhikās* ornamented with *Kapiśīrṣas* are to be built.
9. *Koṣṭhas* of the *Vidyādharas* will be 10, 12, or 14 hands in measure- ment. In between there will be *Bāhikā* which is thrice in height than the *Koṣṭhaka*.

1. After Chittor, Kumbhalgarh is the most famous fortress of Mewar. It is nearly inaccessible even today and can be approached only by a Jeepable road. It was built by Maharana Kumbha in 1448 on a rock plateau which was the site of an earlier ancient fortress.

तदूर्ध्वे कपिशीर्षाणि वसुमात्रान्तराणि च।
दैर्घ्ये सार्धं द्विहस्तानि पिण्डे हस्तमितानि च॥ १०॥

कन्यसं नगरं राज्ञां हस्तैर्वेद सहस्रकैः।
मध्यमं द्विगुणं तस्मान्मध्याद्विगुणमुत्तमम्॥ ११॥

तुल्यं [3]वाष्टांश पादांश सार्धांशैर्दैर्घ्यतोऽधिकम्।
चतुर्विधं भवेदेकं सर्वाणि द्वादशैव हि॥ १२॥

षट्त्रिंशत्प्रथमे दुर्गे देवस्थानानि चत्वरे।
षण्णां वृद्ध्या क्रमेणैव द्वादशैर्द्व्यधिकं शतम्॥ १३॥

मध्ये राजगृहं कार्यं वामदक्षिणतोऽग्रतः।
चत्वराः शोभिता हट्टैः पृष्ठभागे जलाशयाः॥ १४॥

फलानि नानाविधदेशजानि क्रयाणकानीह विचित्रकाणि।
ताम्बुलपुष्पाम्बरमौक्तिकादि राज्ञो गृहाग्रेऽथ सुरस्य कुर्यात्॥ १५॥

पुरं प्रतोलीखटकीकपाटैर्दृढं विधेयं धनधान्यपूर्णम्।
संग्रामयन्त्रैर्विविधैर्भटैश्च सुरक्षकैः सर्वसमृद्धियुक्तम्॥ १६॥

व्यासायामे कनिष्ठं तु नगरं वसुभिर्भजेत्।
मध्यमं सूर्यभागैस्तु षोडशांशैस्तथोत्तमम्॥ १७॥

रेखासु ते प्रतिदिशं मार्गास्तत्र नवावरे।
त्रयोदश पुरे मध्ये ज्येष्ठे सप्तदशै[4]वहिः॥ १८॥

हट्टमार्गस्त्रिधा प्रोक्तो विंशत्यर्ककलाकरैः।
हीनाधिकस्तु कर्त्तव्यो भूमिभागविशेषतः॥ १९॥

---

३. चा - In A
४. चहि - In A

10. Two *Kapisīrṣas*[2] will be on the top, and there will be a gap of eight hands (in between the *Kapiśīrṣas* !). The height will be 21/ hands and the diameter will be one hand.

11. The smallest city of a king will be 1000 hands in measurement, the medium one will be double in size and the best one will be double the size of *Madhyama*.

12. The breadth will be respectively equal to $^1/_8{}^{th}$, $^1/_4{}^{th}$ or $^1/_2$ of the length . Each of the above mentioned cities will have four varieties, and therefore there will be altogether 12 types of cities.

13. In the first type of fort 36 *Pādas* will be marked for temples and courtyards, and this figure will be gradually increased by 12. In the way the number will go up to 102 pādas.

14. The king's palace will be in the centre and on the left, right and front sides there will be courtyards annexed with market places. The water reser- voir will be at the back side.

15. Varieties of fruits from different places, different types of sellable items, betel nuts, flowers, garments, pearls, etc should be displayed in the front side of the palace of the King as well as of the temple.

16. The city will be strengthened with *Pratolī* , *Khaṭakī*, *Kapāṭa* and it will be full of grains and wealth. The place will be well protected with different types of war equipments, well protected warriors; thus the city will be associated with all prosperity.

17. The city which is smallest in length and breadth will be divided by 8, the medium one by 12, and the best one by 16.

18. Along the measure of lines, roads will be drawn on all directions, 9 for the smallest one, 13 for the medium and 17 for the largest type of city from outside.

19. The market roads will be of three types. They are in number 20, 12 or 16. According to the availability of space, they may be more or less in number.

---

2. These parapets were decorated with the battlements like the *Kapiśīrṣakas-Kaṅgooras*. Their height should be of one *hasta*. Another element of beautification and defence was *Kāṇḍavāriṇī*, the *chāldivāri*." *Vāstuśāstra* Part I, Pg 289.

दुर्गे भूमिवशात्कार्या हट्टमार्गजलाशयाः।
सर्वत्र राज्ञ आदेशात्प्रासादभवनादिकम्॥ २०॥

कोष्ठे विद्याधरी बाह्या [५]द्विहस्तान्यधिकोदयौ।
गूढं युद्धासनं कोष्ठे तस्यां वा कारयेत्सुधीः॥ २१॥

गढमध्ये चतुर्दिक्षु मार्गं कुर्यात्प्रदक्षिणम्।
तत्र दुर्गे भवेद्रक्षा गजवाजिपदातिभिः॥ २२॥

तन्मार्गान्मध्यदेशे तु गृहाणि विनिवेशयेत्।
दृढानि पुरगोनृणां परेषां द्वेषिणामपि॥ २३॥

ब्राह्मणान्वासयेत्प्राच्यां क्षत्रं याम्योत्तरे विशः।
वापीकूपादिवारुण्यामुत्तरस्यां तु शूद्रकान्॥ २४॥

शिल्पिरङ्गकरानीशे वह्नौ तज्जीविनोऽन्त्यजान्।
नैर्ऋत्ये शौण्डिकान् वेश्यां वायव्ये लुब्धकादिकान्॥ २५॥

वराहः॥

कोणेषु वसतां दोषाः पुरग्रामगृहादिषु।
तेष्वेव वृद्धिमायाति अन्त्यजाः श्वपचादयः॥ २६॥

ईशकोणे न्यसेत्सूर्यं वह्निकोणे गणाधिपम्।
नैर्ऋत्ये च सहस्राक्षं वायव्यां तु जनार्दनम्॥ २७॥

पूर्वापरमुखादेवा कार्या न दक्षिणोत्तराः।
नगराभिमुखा श्रेष्ठा भङ्गदास्ते पराङ्मुखाः॥ २८॥

गणेशो भैरवश्चण्डी नकुलीशो ग्रहस्तथा।
मातरोमूर्त्तयो देव्याः शुभा दक्षिणदिङ्मुखाः॥ २९॥

हनुमान्वानरः श्रेष्ठो नैर्ऋत्यादिमुखो भवेत्।
गणेशो धनदो लक्ष्मीः पुरद्वारे सुखावहाः॥ ३०॥

५. हस्ताल्य - In A, हस्ताम्य - In D E

20. In a fort, according to the availability of land and with the permission of the king, market roads, water reservoirs, palaces, and houses, will be built.

21. The chamber of *Vidyādharīs* will be constructed outside and its height will be more than two hands. In that chamber, hidden seats for the warriors should be made by the expert architect.

22.Inside, circling the fort, there should be provision for streets on all four sides. In this way, the fort will be protected by elephants, horses, and warriors.

23. The houses are to be built in between two roads. Strong houses are to be built for cows and other people who are opposed to the enemies of the king.

24. Brahmins will reside in the Eastern (*Prācyām*) direction, *Kṣatriyas* in the South (*Yāmya*), *Vaiśyas* in the North. Water-tanks, wells, will be in the west and *Śūdras* will reside in the North.

25. Artists, actors will settle in the North-East (*Īśa*), those who survive based on such other professions and untouchables at the South-East (*Vahni*) corner, wine sellers and prostitutes towards the South-West (*Nairṛtya*) and the hunters (*Lubdhakas*) should be settled at the North-West (*Vāyu*) direction.

Varāha.

26. In a city village or house it is inauspicious if someone resides in a corner plot, but the same will be prosperous for untouchables and *Caṇḍālas*.

27. The Sun God will be placed in the *Īśa* corner, *Gaṇādhīpa* in the *Vahni* corner, *Sahasrākṣa* (*Indra*) in the *Nairṭya* and *Janārdana* will be placed in the *Vāyu* corner.

28. The God should face either towards East or West, never towards South or North. It is best if they face towards the city other-wise the deities will break.

29. The temples of *Gaṇeśa*, *Bhairava*, *Caṇḍī*, *Nakula* as well as other planets, and mother goddess are regarded as auspicious if they face towards the South.

30. The apes (*Hanumān*), monkeys are best if their faces are towards the South-West (*Nairṛtya*) corner. *Gaṇeśa*, *Dhanada* (*Kubera*) and *Lakṣmī* bring hap-piness if placed on the palace gate.

वृत्तं वृत्तायताष्टास्रे अष्टपत्रं यवाकृतिः।
स्वस्तिकं पुरुषाकारं दुर्गमित्यादौ सौख्यदम्॥ ३१॥

एक द्वि शकटाकारं त्रिकोणं रसकोणकम्।
वज्रत्रिशूलभुजगाकारं कर्णाधिकं त्यजेत्॥ ३२॥

नगरं शोभितं कार्यं हट्टप्राकारगोपुरैः।
प्रसादभवनोद्यानकीर्त्तिस्तम्भजलाशयैः॥ ३३॥

पुरार्धेन भवेद्ग्रामो ग्रामार्धेन तु खेटकम्।
खेटकार्धेन कूटं स्यात्कूटार्धेन तु कर्वटम्।। ३४॥

पुरे ग्रामे क्रमान्मार्गाः खेटे कूटे च कर्वटे।
कार्या सप्तदशाङ्केषु त्रिद्विसंख्या दिशं प्रति॥ ३५॥

इति दुर्गनगरादिलक्षणम्॥

दुर्गाणां रक्षणार्थाय यन्त्राः कार्या यथाविधिः।
भवन्ति जयदा राज्ञां मद्य[६]मांसादिपूजिताः॥ ३६॥

देवासुररणे दैत्यैः प्रबलैर्निर्जिताः सुराः।
[७]ततो यन्त्रा गिरीशेन गदिता विश्वकर्मणे॥ ३७॥

भिन्नास्ते यन्त्रपाषाणैः रक्तबिन्दुविवर्जिताः।
उत्थानरहितादैत्या स्तदा देवैर्विनिर्जिताः॥ ३८॥

चतुरशीतियन्त्रेषु नववायोर्जलस्य च।
अग्नियन्त्रस्य षड्भेदाः षष्टिसंग्रामयन्त्रजाः॥ ३९॥

अष्टहस्ता यस्य यष्टी स यन्त्रो भैरवो मतः।
नवभिश्चन्द्रसम्पत्तिर्दशभिस्त्वादिभैरवः॥ ४०॥

६. मांश - In A
७. लक्षेयंगा - In C
After v35 Ms B writes सम्बत् १७९१ ।। पौष शुद्ध ४ बुधे ११ श्रीः

31. The fort brings happiness if its shape is circle, oval, eight cornered, eight sided, and shape of a barley, *Svastika* or *Puruṣa*.

32. One or two may be of the shape of a cart and a fort may have three or six corners in the shape of *Vajra*, trident or serpent; excess corners should be discarded.

33. The city should be decorated with markets, ramparts, *Gopuras*, palaces, houses, gardens, pillars of fame and water reservoirs.

34. A village will be half of a city, a *Kheṭaka* will be half of a village, a *Kūṭa* will be half of a *Kheṭaka*, and a *Karvaṭa* will be half of a *Kūṭa*.

35. In a city, village, *Kheṭaka*, *Kūṭa*, or *Karvaṭa* the roads should be serially constructed. Among the 17 number of roads there will be three or two roads in each direction.

These are the characteristics of a fort and a city-etc.

36. For the protection of a fort, machines should be manufactured in the prescribed method. The king will be victorious if he worships those with offerings of wine and meat.

37. While the war was going on between the Gods and demons, the powerful demons overpowered the Gods. At that time, Lord Śiva narrated the method of making weapons to *Viśvakarmā*.

38. Those weapons were of different types and made of stone, which were devoid of blood stains. (After their use) the demons were unable to get up and the Gods became winners .

39. Among eighty four types of machineries, nine are meant for using in the air, nine are for water. Firearms are of six types and war machines are of sixty varieties.

40. The weapon, which has an eight cubit long rod, is known as *Bhairava*, while *Candrasampatti* is known to have nine cubits and *Ādibhairava* is with ten cubit long rods.

यस्य रुद्रकरैर्यष्टी गजभीमः स उच्यते।
अर्कहस्तायता यस्य स यन्त्रो युग्मभैरवः ॥ ४१ ॥

त्रयोदशकरैर्वह्निर्यमदण्डश्चतुर्दश।
तिथिहस्तो महारौद्र इत्यष्टौ भैरवा मताः ॥ ४२ ॥

मर्कटी भैरवाख्यस्य त्रिकरा मध्यतः शुभाः।
द्वात्रिंशदङ्गुलां यष्टीं तस्या पृष्ठे तु कारयेत् ॥ ४३ ॥

पिण्डे षडङ्गुला यष्टी पृष्ठे व्यासे कलाङ्गुलाः।
अग्रे वेदाङ्गुला [८]पृष्ठे कर्त्तव्या दृढकाष्टजाः ॥ ४४ ॥

पृष्ठे छिद्रं तु यष्ट्याश्च मध्याद्वेदाङ्गुलं भवेत्।
मर्कटी सुदृढा पिण्डे कर्त्तव्याऽष्टाङ्गुला समा ॥ ४५ ॥

लोहेन चर्मणा यष्टीं मर्कटीं कारयेद्दृढाम्।
अग्राङ्गुली [९]प्रकर्त्तव्येत्वष्टमात्रे सुलोहजे ॥ ४६ ॥

गोः फणा वसुहस्ता च दैर्घ्ये सूत्रदुकूलजाः।
फणा कलाङ्गुला व्यासे दैर्घ्य तद्द्विगुणा मताः ॥ ४७ ॥

नखाङ्गुला वा कर्त्तव्यो बाहुपाषाणवाहने।
पञ्जरं त्रिकरं दैर्घ्ये वेदाङ्गुलिसमन्वितम् ॥ ४८ ॥

मर्कट्यङ्गे द्विहस्तं च पृथुत्वे(ऽ)ब्धिषडङ्गुलम्।
द्वौ स्तम्भौ पञ्जरस्यापि कुलिन्दाख्यौ प्रकीर्त्तितौ ॥ ४९ ॥

मूर्घ्नि छिद्रे तयोर्यष्ट्याः पृष्ठछिद्रे इषु क्षिपेत्।
दृढां धातुमयीं कीलां पञ्जरस्यावलम्बने ॥ ५० ॥

पञ्जरं पूरयेद्धातुपाषाणैर्यन्त्रवाहने।
सुदृढं कीलकै पट्टी चर्मभिः कारयेदिदम् ॥ ५१ ॥

८. पिंडे - In A
९. कर्तव्या अष्ट - In A

41. That rod which is eleven cubits long, is known as *Gajabhīma, (while) Yugmabhairava* has twelve cubits long rods.

42. *Vahni* is known to have thirteen cubit long rods and *Yamadaṇḍa* has fourteen cubits. *Mahāraudra* has 15 cubits long rods and these eight fall into the *Bhairava* category.

43. *Markaṭī* falls into the *Bhairava* category and it is auspicious if its middle part is three hands in length; at its back, a rod measuring 32 fingers in length is to be fixed.

44. A sixth *Aṅgula* rod should be fixed on the back side of the *Piṇḍa*(base) and the width of the rod will be two *Aṅgulas* (*Kalāṅgulas*). The front part of the base(*Piṇḍa*) will be four *Aṅgulas* and the back part should be made of strong wood.

45. The hole at the back of the rod will be measured at a distance of four *Aṅgulas, Markaṭī* should be firm at the base(*Piṇḍa*) and it should be equal to eight *Aṅgulas.*

46. Both the rod and the lever (*Markaṭī*) should be made strong with iron or leather belts. The front part should be made of iron and measure eight *Aṅgulas.*

47. A bandage used as a catapult (*Gophaṇā*) will be eight hands in length and the material will be made of silk thread. The cap will be two *Aṅgulas* in breadth and double the size in length.

48. The iron cage (*Pañjara*) will be three hands and four *Aṅgulas* in length (or fourfold), and it may be fitted with hands and claws for bringing stones.

49. The *Markaṭī* will be two hands in diameter and its breadth will be thirteen *Aṅgulas.* The two pillars of the *Pañjara* will be known as *Kulinda* .

50. There will be a hole on the top of those two rods/and on the back- side also, through which arrows are to be shot. Strong metal nails will support this *Pañjara* (cage).

51. The *Pañjara* should be filled up with stones, metals, and it should be made strong with the help of nails and leather covers.

स्तम्भास्तु षट्करा [१०]व्यासे दैर्घ्ये मूर्ध्नि त्रिहस्तकाः।
ऊर्ध्वे द्विभागौ त्र्यंशोऽधस्तत्रोत्पलनिवेशनम्॥ ५२॥

ऊर्ध्ववेल्लनिका तेन समापिण्डे युगाङ्गुलाः।
दशाङ्गुलान्तरे चान्या कर्त्तव्या चक्रवेल्लनी॥ ५३॥

चक्रवेल्लनिकामध्यादशीत्यङ्गुलनिर्गमा।
चक्रमानं द्विहस्ता तु पादोन त्रिकरावधिः॥ ५४॥

ऊर्ध्ववेल्लनिकाधस्तात्प्रान्ते लोहस्य कीलिका।
दक्षे कलाया रक्षार्थं ततो बन्धविमोक्षणम्॥ ५५॥

ज्योतिका रक्षकं मध्ये कारयेत्कीलकं पुनः।
पार्श्वयोर्वृद्धवेल्लन्यां तनिकाकर्षणाय च॥ ५६॥

विनाभ्यासेन सर्वेषां केवलं निष्फलः श्रमः।
तस्मादभ्यसतो लक्ष्यादखिलं प्राप्यते गुरोः॥ ५७॥

वाहयेत्प्रथमं शून्यं द्वितीये निक्षिपेद्बलिम्।
तृतीये माहिषं मुण्डं चतुर्थे गोलकं क्षिपेत्॥ ५८॥

तत्र भैरवभैरव्योः पूजा कार्या सदा नृपैः।
रक्तादिपुष्पैर्नैवेद्यैर्मद्यमांसै[११]र्जयार्थिभिः॥ ५९॥

[१२]दैर्घ्ये मन्वङ्गुलं प्रोक्तं व्यासायामे षडङ्गुलम्।
यन्त्रैर्हस्तमिते कैश्चित् कार्यं युक्त्या सुपञ्जरम्॥ ६०॥

स्तम्भाभ्रमणयन्त्रे तु कर्त्तव्या पञ्च पञ्च च।
हस्ततिथ्यङ्गुला दैर्घ्ये कर्त्तव्या तस्य वेल्लनी॥ ६१॥

प्रमाणं पूर्ववत्तस्य स्तम्भैर्भेदः प्रजायते।
लोके या ढिङ्कुली सोऽपि गौरीयन्त्रः प्रकीर्त्तितः॥ ६२॥

१०. कर्णौ - In A
११. जयादि - In B, जपादि - In E
१२. दैर्ध्य - In B

52. The width of the pillars will be six hands and its length from the top part will be three hands in measurement. The upper part consists of two sections and the third section known as the lower part will contain sharp, flat, iron blades.

53. The upper disc will be equal in measurement to the third part and the base (*Piṇḍa*) will be four *Aṅgulas*. Another round disc should be fixed at the distance of ten *Aṅgulas*.

54. From the center of the round disc, the exit will be measured at a distance of eighty *Aṅgulas*. The measurement of the *Cakra* will be from two hands to $2\,^{3}/_{4}$ th hands (minimized by one *Pada* up to three hands).

55. An iron nail will be fixed on the corner of the lower part of the upper disc. The right hand part is to be reserved for mechanical contrivance and its subsequent discharge.

56. One nail should be fixed for the fire-container inside and again for the pulling of the thread connecting the large side wheel.

57. Without practice, the effort of everybody will be fruitless. Therefore one should practise constantly under the instructor to attain success.

58. At first the target is in the air, in the second chance towards the *Bali*, in the third to the bulls-head and in the fourth the throw will be an iron ball.

59. So, a King will always worship *Bhairava* and *Bhairavī* with red coloured and other flowers, devotional gifts (*Naivedya*), wine, meat, prayers etc.

60. A well built *Pañjara* should be made after discussion; its length will be of fourteen *Aṅgulas*, breadth and diameter will be of six *Aṅgulas*; but, according to some, the arms will be measured with hands.

61-62. The columns should be made five in number in the revolving machine. The actual length of the disc will be fifteen *Aṅgulas*, if measured by *Hasta*. Its measurement will be as outlined before, the only difference being by columns. Among the people what is known as *Ḍhiṅkulī*, is the same as *Gourīyantra*.

एकस्तम्भेन मर्कट्या सर्वतोऽपि भ्रमत्ययम्।
यष्ट्यर्धे पक्षके तस्य दैर्घ्ये व्यासे त्रिभागतः॥ ६३॥

पक्षयोश्च युगांशेन यष्ट्यासन्नात्र मर्कटी।
पाषाणं बन्धयेत्पृष्ठे भारः सर्वत्र कारणम्॥ ६४॥

विधेयौ पक्षकौ स्तम्भे वेल्लन्या भ्रमणर्थकौ।
मर्कट्या यावती दैर्घ्ये ढिंकुली तावताधरः॥ ६५॥

धरा दैर्घ्ये त्रिभागेन वेल्लनी पक्षकौ न्यसेत्।
उत्तमोऽनेकयन्त्रेषु गौरीयन्त्रः प्रकीर्तितः॥ ६६॥

सर्वतो [१३]भ्रमणात्तेन सुखोपायेन सिद्धितः।
यन्त्रवाहाय सत्कृत्य दातव्यं नरनायकैः॥ ६७॥

काञ्चनाभरणाक्षौमं ग्रामसद्वाहवाहनम्॥ ६८॥

इति संग्रामयन्त्रलक्षणम्॥

अग्नियन्त्रेषु नलेष्टाकाष्ठभल्लेशममोक्षणे।
सा तु रीतिमयी काष्ठादत्यायासेन साध्यते॥ ६९॥

दृढा लोहमयी शस्ता सुबन्धैर्कटकैर्युता।
धत्तुरपुष्पवद्दैर्घ्ये त्रिगुणा षड्गुणावधिः॥ ७०॥

मुखे द्विगुणिता मूलात्सार्धा वाप्यधिका भवेत्।
केचिद्पृष्ठे प्रकुर्वन्ति शंखावर्त्तेन ढङ्कनम्॥ ७१॥

केचित्सुमुद्रितां तत्र सूक्ष्मछिद्रेऽग्नियोजनम्।
औषधं प्रक्षिपेदस्यां मूले नालप्रमाणतः॥ ७२॥

औषधाग्रे दृढं काष्ठं नालतुल्यमथायतम्।
नालमुखे क्षिपेद्गोलं काष्ठं वा लोहसंयुतम्॥ ७३॥

१३. धूर्मवर्णं ते - In D

63. This machine moves all round by one pillar of the *Markaṭī.* (In a *Markaṭī* one column is moving it everywhere .) The wings will be on the half part of the rod and the length and breadth will be 1/3rd each.

64. The *Markaṭī* will be placed neither on the 1/4th part of the wings, nor near the rod. A boulder should be hung at the back for a uniform distribution of the pressure.

65-66. Two wings are to be set up on the pillar for moving the discs. The height of the *Markaṭī* will be similar to the scale of the *Ḍhiṅkulī.* The length of the scale will be divided into three segments. The disc and the two wings are to be placed therein. Among various arms of superior quality, *Gourīyantra* is one such.

67-68. It can easily move everywhere, and it is conducive to easily available comforts. The carriers of the machines are to be rewarded with gold ornaments, silks, villages and excellent vehicles for journeys, by the leader of the people.

Thus ends the definition of war machinery.

69. Among the fire arms (*Agniyantra*) the tubular weapon is used to throw bricks, wood, spears and stones. It is made of either brass or bell metal and there is a cardinal point by which one can easily aim at the target.

70. It should be strong, made of iron, close knitted and ornamented with a serpent belt (*Kaṭaka*). It will be like the *Dhattura* flower, but the length will be three to six times.

71. The front part will be twice the base, the base part is half or little more. Sometimes on the back a cover will be made like the whirls of a conch.

72. Some mark a small hole there for ignition. According to the size of the tube, medicament is to be inserted.

73. A piece of wood according to the size of the tube is to be placed in front of the medicament. Then, in the mouth of the tube, iron or wooden balls are to be put inside.

पृष्ठछिद्रेऽग्निसंयोगाद्गोलाद्यं याति दूरतः ।
पुरप्राकारगेहादि ग्रामारामविमर्दनम् ॥ ७४ ॥

रिपूणां ते प्रकुर्वन्ति सैन्ये त्रासं च दारुणम् ।
राज्ञा जयकरा एते वह्नियन्त्रा अनेकशः ॥ ७५ ॥

विबुधैर्विहिताः पूज्याः पक्वान्नमदिरामिषैः ।
हव्यवाहनलीवांशी चर्मनद्धाद्विमुष्टिकाः ॥ ७६ ॥

दैर्घ्यं कार्यार्धदैर्घ्यस्य चतुर्थांशेन विस्तरा ।
ईषदार्द्रेण सूक्ष्मेण पूरयेदौषधेन ताम् ॥ ७७ ॥

कुट्टयित्वा मुहुस्तस्यारिक्तमेकांगुलं मुखम् ।
औषधार्धेन पृष्ठे स्याद्रन्ध्रं वह्नेर्यवप्रभम् ॥ ७८ ॥

एकद्वित्र्यङ्गुलैकं बां [वांशं ?]सरलामत्र तोलयेत् ।
सूर्योरुबुकसिंहास्य निर्वाणाङ्गारचूर्णकम् ॥ ७९ ॥

अग्नियन्त्रौषधार्थं तु गृहीतव्यं यथोदितम् ।
पञ्चषट्सप्तचाष्टौ वा भागाश्चेति शिलाजतोः ॥ ८० ॥

गन्धस्यैकक्रमाच्चूर्णं सार्धं सार्धंद्वियुग्मकम् ।
तद्भेषजस्य मार्गोऽयं भेदा अन्येऽप्यनेकशः ॥ ८१ ॥

वह्निसंयोगतस्तेषां दृश्यते बहुधा गतिः ।
गैरेयं द्विगुणं गन्धात्कुर्यात्तोयेन गोलिकाम् ॥ ८२ ॥

हव्यवाहा मुखे तारा वैरिणां पुरदाहकाः ॥ ८३ ॥

इति अग्नियन्त्रलक्षणम् ॥

74. With ignition at the back, the ball goes far and it destroys city gates houses, villages and pleasure gardens.

75. These fire arms create panic among the enemy's soldiers and these mostly bring victory for the Kings in many ways.

76-77. The weapon is to be worshipped with cooked rice, wine and meat. That part of the fire tube which is covered with skin, will measure eight *Aṅgulas* (*Dvimuṣṭikā*). The length will be for consideration of utility and the breadth will be 1/4th of the 1/2 of the height. That tube is to be filled up with slightly moistened minerals.

78. The minerals have to be repeatedly ground and the front part measuring one *Aṅgula* will be filled up and the residual ground minerals are to be poured into the small hole, measuring one *Yava*, at the back for ignition.

79. One should measure one, two, three *Aṅgulas* of the *Sūrya* (*Arka* (tree), the front part of the *Siṁha* (Olibanum tree), *Rubuka* (Castor oil) and burnt coal dust.

80. In addition to the minerals earlier prescribed for fire arms, five, six, seven or eight parts of bitumen are to be used.

81. One part of the sulphur (*Gandhaka*) is to be taken in proportion of half, half and a pair of two. This is the procedure of taking the minerals and there are innumerable other varieties.

82. After ignition, different directions of fire are marked. The balls are to be made with bitumen, with twice the amount of sulphur mixed with water.

83. From the mouth of the tube, the fire emits like stars and it will burn the city of the enemies.

Here ends the description of the fire arms.

अथ जलाशयाः ॥

युधिष्ठिरं प्रति श्रीकृष्णवाक्यम् ॥

वरं वर्षशतेनापि कृतैकाविहरी वने।
नासञ्चिता गृहे कोटीक्षणध्वंसि धनस्य हि ॥ ८४ ॥

सर्वस्वेनापि कौन्तेय भूमिस्थमुदकं कुरु।
कुलानि तारयेत्सप्त यत्र गौर्वितृषी भवेत् ॥ ८५ ॥

नन्दाभद्राजयावापी विजया च क्रमाद्युताः।
त्रिषठ्नवार्ककूटैः स्युरेकद्वित्रिचतुर्मुखैः ॥ ८६ ॥

कूपाः स्युर्वेदहस्तादि दशहस्तान्तविस्तराः।
श्रीमुखो विजयः प्रान्तो दुन्दुभिश्च [१४]मनोहरः ॥ ८७ ॥

चूडामणिश्च दिग्भद्रो जयो नन्दनशङ्करौः।
कुण्डं युगास्त्रं भद्रं स्यात्सुभद्रं भद्रसंयुतम् ॥ ८८ ॥

प्रतिभद्रैर्युतं नन्दं परिघं मध्यभिट्टवत्।
शतान्तमष्टहस्तादि चतुर्द्वाराणि कारयेत् ॥ ८९ ॥

मध्यभिट्टे च शालासु देवार्चास्तत्र विन्यसेत्।
सरोनामार्धचन्द्राभं वृत्ताकारं महासरः।

चतुरस्त्रं तु भद्रं स्यात्सुभद्रं भद्रसंयुतम्।।९०।।

अथ उद्यानम् ॥

आरामकारकोनाके वसेदिन्द्रायुतत्रयम् ॥ ९१ ॥

शूराणां पूजनं भोगः प्रीणनं प्राणिनां ततः।
पुरादिमध्ये बाह्ये वा कुर्यादुद्यानमुत्तमम् ॥ ९२ ॥

१४. नमोहरः - In D

Now the reservoirs:

It is *Śrīkṛṣṇa's* advice to *Yudhiṣṭhira* :-

84. It is better to roam around the forests for a hundred years than to reserve money in the house, for wealth may be destroyed within a moment.

85. So, O *Kaunteya*– even if you have to give all your money, dig one water reservoir in the land. If the cows are made free of thirst then your seventh generation will be relieved from worldly sufferings.

86. The water reservoirs named as *Nandā*[3], *Bhadrā, Jayā* and *Vijayā* will be serially connected with three, six, nine, and twelve projections with one, two, three, and four entrances.

87-89a. Dimensions of the *Kūpas*[4] will start from four hands up to ten hands. They are of manifold varieties known as - *Śrīmukha, Vijayā, Prānta, Dundubhi, Manohara. Cūḍāmaṇi, Digbhadra, Jaya, Nandana* and *Śaṅkara*. The *Kuṇḍas* will be square in shape and their varieties will be *Bhadra, Śubhadra* which is an addition to *Bhadrā, Nandā*, which is attached to *Pratibhadra* and *Parigha* which is similar to *Madhyabhiṭṭa*.

89b-90a. In breadth, a *Kuṇḍa* will be from eight hands to 100 hands and it will be accompanied by four entrances. In the *Madhyabhiṭṭa* as well as in *Śālā*, an image of God should be installed. *Sara* resembles the half crescent of the Moon while *Mahāsara* is round in shape. *Bhadra* is a square one, while *Subhadra* is joined together with *Bhadra*.

Now the garden:

90b-92. He, who lays out a pleasure garden, resides in the heaven for 420,000 years. There he does worship of the gods, has enjoyment and by pleasing the creating beings. The best type of garden is to be created either inside or outside the city.

---

3. Nandā - Ekavaktra and Trikūṭa
Bhadrā - Dvivaktra and Ṣatkūṭa
Jayā - Trivakra and Navakūta
Vijaya - Caturvaktra and Dvādaśakūta L.K. Shukla - P. 53

4. Here we find a Kūpa will be from 4 hands to 10 hands in dimension but in L.K. Shukla's book which mainly deals with Samārangaṇa Sūtradhāra, reference of a Kūpa measuring 13 hands is also available.

गृहस्य वामे दक्षे वा एकद्वित्रिधनुःशतैः ।
नानाद्रुमलतोपेतं क्रीडास्थानशतैर्वृतम् ॥ ९३ ॥

तोयाशयः घटीयन्त्रधारागृहविराजितम् ॥ ९४ ॥

इति श्रीसूत्रधारमण्डनविरचिते वास्तुशास्त्रे पुरदुर्गजलाशयलक्षणाध्यायस्तृतीयः ।

93-94. It will be either on the right side or left side of the house, and its measurement will be one, two or three hundred *Dhanus*[5]. It is adorned with varieties of trees, creepers, hundreds of playgrounds, water-reservoirs, water-buckets, and bathrooms with showers.

Thus ends the third chapter of Vāstumaṇḍana, the book of architectures written by Śrī Sūtradhāra Maṇḍana. It describes the fort machineries and water reservoirs. There are 94 Ślokas.

5. F.N. चतुर्हस्तैर्धनुर्दण्ड: 4 hands = 1 Dhanu - 1 hand approximately 18 inches - 4 x 18 = 72 inches Dhanu 72 x 100 = 7200 inches = 60 ft.

चतुर्थोऽध्यायः

[गृहादिनिवेशः]

गृहं हि सर्वजन्तूनां लयस्थानं सुखास्पदम्।
त्रिवर्गसाधनं पुण्यमिष्टापूर्त्तप्रवर्त्तकम्॥ १ ॥

शीतवाताम्बुघर्मादि दुःखघ्नं मुनिभिर्मतम्।
वाटभित्तं पुरा कृत्वा तन्मध्ये कारयेद्गृहम्॥ २ ॥

चतुर्हस्तं गृहं व्यासे प्रोक्तं श्रीविश्वकर्मणा।
द्वात्रिंशत्करपर्यन्तं ततो दैर्घ्येऽपि तत्समम्॥ ३ ॥

साष्टमांशं सपादं वा सार्धं वा द्विगुणावधिः।
विस्तारादधिकं दैर्घ्ये श्रेष्ठं व्यासे भयावहम्॥ ४ ॥

द्वात्रिंशत्कर[१]विस्तीर्णं भवेद्ब्राह्मणमन्दिरम्।
प्रत्येकं क्षत्रियादीनां चतुर्हस्तैर्विहीनकम्॥ ५ ॥

दशाष्टत्रिचतुर्भागैरायामे क्रमतोऽधिकम्।
एतन्मूलगृहं प्रोक्तं तद्बाह्ये वाटभित्तिका॥ ६ ॥

प्राकारकोटभित्तीनां प्रमाणं तु यदृच्छया।
मध्यक्षेत्रे प्रकर्त्तव्यमायव्ययविशोधनम्॥ ७ ॥

सर्वक्षेत्रान्तरे शालालिन्दकोष्ठादिनिर्मितः।
कार्या पुत्रधनक्रीडाभोजनादिकं सन्ततेः॥ ८ ॥

---

१. विस्ताद्रं in B विस्तारं in CDE

Chapter IV

[Gṛhādiniveśaḥ]

Now the arrangement of the houses

1. For every living being, the house is the dwelling place and it is the place of enjoyment too. It also leads to the fulfilment of three goals in life and it encourages one towards the holy works, both material and heavenly.

2. According to the ancient sages it (house) protects us from the sufferings caused by cold, wind, water and summer heat. After constructing a road and enclosure, the house should be built inside.

3. According to *Srī Viśvakarmā*, the breadth of the house starts from four hands in measurement, and will extend up to 32 hands, and the length will be equal to that.

4. The length should be more than the breadth by 1/8th, 1/4th, 1/2 or double, but if breadth exceeds the length, it would be dangerous.

कारयेद्भवनं प्राज्ञो दुःखशोक[१९]भयं ततः ॥४७ ॥

तथा च।

सुरवैरिनृपामात्यचौरपाषण्डपापिनाम्।
चत्वारां त्यज धूर्त्तानां समीपे दुःखदं गृहम् ॥४८ ॥

न कुर्यादर्हतः पृष्ठे अग्रतः शिवसूर्ययोः ।
पार्श्वयो र्ब्रह्मविष्णोश्च गृहं चण्डयाः समन्ततः ॥४९ ॥

शिवसूर्यजिनादीनामन्तरे न शुभं गृहम्।
मार्गश्चैको यदा गच्छेदुभयोर्गृह[२०] पार्श्वयोः ॥५० ॥

मार्गवेधस्तदा स स्याच्छोकसन्तापकारकः ।
गृहपृष्ठं समालोक्य प्रवेशो न शुभङ्करः ॥५१ ॥
मार्गान्तरे त्वादिभूमिः समभित्त्या न दूषणम् ॥ ५२ ॥

मत्स्यमते।

स्तम्भं वा भवनं वापि द्वारं वासगृहं तथा।
दिङ्मूढे कुलनाशः स्यान्न च सम्बर्द्धयेद्गृहम् ॥५३ ॥

---

१९. फलं in A
२०. पृष्टयो in B

Bhoja

45. Whether it is *Dviśālā, Triśālā* or *Catuśśālā* a building without any portico yields bad results.

According to another work

46. A *Śālā* house without any portico in the front, back or side is inauspicious, but it is praiseworthy for a temple.

47. A wise man should not build a house near a temple or near a wicked person's house or a councilor's residence or near the sacrificial ground as these cause fear or grief and sorrow.

Also

48. A house gives painful results if built near a temple, or the house of a warrior, enemy, King, councilor, thief, heretic, sinful men. One should avoid building near a courtyard or a cunning person's house.

49. One should not build one's house in the rear of a Buddhist temple or in the front of a *Śiva* and *Sūrya* temple, nor on the side of a *Brahma* and *Visṇu* temple, nor around a *Caṇḍī* temple.

50. A house, if built in between the temple of *Śiva, Sūrya* or *Jina* and if the road runs by both sides of a house, it is not regarded as auspicious.

51. Then it is known as obstruction of road and it causes grief and sorrow. The entrance facing the exit is not auspicious.

52. But if the main plot of land is on the other side of the road and it is equal to the wall there is no fault.

So says the Matsyapurāṇa

53. If the correct orientation is not done for a pillar, house, door, as well as a dwelling place, then there will be destruction of one's family, and one should not extend his house in such a manner.

यदि सम्बर्द्धयेद्गृहं सर्वमेव विवर्द्धयेत्।
प्राग्वर्धिते मित्रवैरं याम्ये शत्रुभयं गृहे ॥५४॥

पश्चिमेऽर्थविनाशस्यान्मनस्तापस्तथोत्तरे।
आग्नेयेऽग्निभयं विन्द्याद्राक्षसे तु शिशुक्षयम् ॥५५॥

[२१]वायव्येऽनिल [२२]रुक्कोपं ईशाने शस्यसंक्षयम् ॥५६॥

मयः ॥

वृद्धिं गृहादिवास्तूनामिच्छेद्यदि समृद्धितः।
प्रागुत्तरे सर्वतो वा वर्धयेन्नान्यतो गृहम् ॥५७॥

ग्रन्थान्तरे।

संवर्धनं च वास्तूनां वास्तुसम्बरणानि च।
द्वाराणां परिवृत्तिश्च मृत्यवे स्यान्न संशयः॥ ५८॥

मयः।

इष्टव्यासायामं प्रागेवालं विचिन्त्य कर्त्तव्यम्।
तस्माद्धीनं यत्तत्सततं विपदांपदं भवति ॥५९॥

भोजः।

स्थापितद्वार[२३] संरोधे गृहिणो जायतेऽश्मरी।
कृतानि यत्र चीयन्ते गवाक्षालोकनानि च ॥६०॥

तत्र प्रसूतिर्न भवेन्निष्पन्नापि विनश्यति।
कुड्यं भित्वा न कर्त्तव्यं द्वारं तत्र सुखेप्सुभिः ॥६१॥

---

२१. व्ययब्ये. in A
२२. सष्कोपं. in A
२३. मम्बोध. in DE

54. If there is any occasion of extension of the house, one should extend it in all directions. If any extension is done in the East there may be quarrel with friends, if in the South there is a fear from enemies.

If extended in the West there is loss of wealth, and if in the North there will be mental agony.

55-56. If in the South-East, there will be fear from fire. In the South-West, there will be loss of child, and if in the North-West there will be fear from the wind and there will be loss of grains if in the North-East.

Maya

57. If one wants to extend his house or *Vāstu* with prosperity, he should extend it towards the East, North or on all sides, not on other sides of the house.

In other works

58. While carrying out extension or diminution of a house, the alteration of a door will cause death, and there is no doubt about this.

Maya

59. Desired length and breadth should be ascertained properly, (before starting a construction). If less than the prescribed measurement, it always brings danger.

60. If there is any obstruction to the constructed door and if the windows already set up and other sources of light are diminished or cut down, the inmates of the house will turn into gravel.

61. Then there will be no birth, and those conceived will be lost. So, one who wants to attain happiness should not build a door by breaking the wall.

द्वारे च जलनिःश्रावं नैव कुर्याद्विचक्षणः ।
निम्नोन्नतं करालं च सम्मुखं पृष्ठदेशगम् ॥६२ ॥

वामावर्त्तं च न शुभं द्वारमग्रतरं गृहे ।
स्तम्भं द्वारं च भित्तिं च विपरीतं न कारयेत् ॥६३ ॥

कटुकण्टकि दुर्गन्धिः गुह्यकाद्याश्रयान्द्रुमान् ।
न धारयेत् समीपस्थान्पुरप्रासादवेश्मनाम् ॥६४ ॥

[२४]शालासु भिन्नशालासु सन्धिकर्म न कारयेत् ।
देवतास्थापनं पिण्डशालासु न विधीयते ॥६५ ॥

अन्योन्यसन्धिबिद्धं च शिखा कीलस्य वेधनम् ।
धर्मार्थकामसौख्यानां विनाशं नित्यमादिशेत् ॥६६ ॥

अज्ञैः सन्तापवद्भिर्वा परद्रव्यैश्च निर्मितम् ।
त्वरितं [२५]पूर्णतां नीतं स्थपतिद्वयकारितम् ॥६७ ॥

विनष्टवास्तुसञ्जातद्रव्यैरपि विनिर्मितम् ।
अतृप्तवास्तुदेवं यद्गर्भविन्यासवर्जितम् ॥६८ ॥

अक्रमेण कृतं वापि वास्तु तद्याति शून्यताम् ।
अनुवंश न भुञ्जीत न शयीत कदाचन ॥६९ ॥

भुञ्जानस्यार्थनाशस्याच्छयानस्य न निवृत्तिः ।
यत्र भुक्तं यथास्थानं पात्रधान्याम्बरादिकम् ॥७० ॥

भग्नभाण्डगतं चान्नं मुखवातोपसाधितम् ।
रजस्वला श्वा न दृष्टं सन्ध्ययोर्वा विदिङ्मुखम् ॥७१ ॥

---

२४. Similar verse in Mayamatam ch 27 v 73 cd 74 ab

२५. पूर्णतानान्तं in A

62-63. A wise person should never make a water-outlet through the door. The front and back part of the door should not be too high or low or frightening. A door should not to be made in such a way as to turn to the left from the front of the house. The pillar, door and wall should not stand in opposition to each other.

64. Thorny, pungent, foul smelling trees, and others inhabited by ghosts should not be planted near a city, palace, or residential building.

65. One should not attach one type of *Śālā* with another type. One should not consecrate a deity in the *Piṇḍaśālā* (disjoined house).

66. If the joinings clings to one another and the tenor obstructs the nail (peg), it always indicates the destruction of *Dharma, Artha, Kāma,* and *Soukhya* (friendship).

67-68. If a house is built by an ignorant or distressed person with other than the prescribed material or if it is completed quickly by two architects or if a house is built with the material collected from waste, and if the plinth is devoid of a ground plan, the *Vāstudeva* is dissatisfied.

69. If a house is built without any order, it becomes useless. One must not sleep or take food on supporting floorboards (or genealogical table).

70. A man eating food there suffers monetary loss, and one sleeping there suffers prolonged drowsiness. It is not proper to leave utensils, rice and clothing in an open place (then it brings no good).

71. And in the same place if the food is kept in a broken utensil, the food is cooled by the mouth-wind, the place is covered with dust, it is not visible in the evening or is in the wrong direction, then it brings no good.

भग्नासनगतैर्यद्वा [२६]आसन्दीस्थैश्च भुज्यते।
यत्रोपघातवत्किञ्चिद्भक्ष्यं पेयमथापि वा ॥७२ ॥
पंक्तिभेदो वृथापाक: पाकभेद: सदाकलि: ॥७३ ॥

आभ्युक्षणं च संध्यायां यत्र कण्टकिनो द्रुमा:।
भार्या पुनर्भूवल्मीकं यत्र निष्पातवल्लरी ॥७४ ॥

मुसलोलूखले स्त्रीणामास्या (?) तद्वदुदुम्बरे।
[२७]मन्त्रस्यावस्करे शस्त्र: पक्वा पक्वान्नलङ्घनम् ॥७५ ॥

स्थालीपिधाने वा दर्व्यास्तलेनाग्निसमर्पणम्।
उच्चैर्वदन्ति वा रात्रौ नीचैर्ज्वलति वानल: ॥७६ ॥

पितृनभिवन्दत्येवं पुत्रभार्यास्तथा पतीन्।
यत्र धान्यं विप्रकीर्णं काकमूषिकभोजनम् ॥७७ ॥

अपावृतं पयस्त्विष्टे उच्छिष्टै: स्पृश्यते घृतम्।
बालानां प्रेक्षमाणानां वृद्धा भक्ष्यं च भुञ्जते ॥ ७८ ॥

पाचयन्त्यात्मनोऽर्थेऽन्नं वृथैवं मांसभक्षिण:।
उत्सूरशायिनो यत्र पुरुषाश्च प्रागे निशा: ॥७९ ॥

आश्रमस्थान्विधर्मस्था: प्रद्विषन्ति परस्परम्।
परस्वा [२८]दानुरुचयो विपण्यभ्यवहारिण: ॥८० ॥

अशुश्रूषुर्गुरो: शिष्यो यत्र शिष्यसखागुरु:।
शास्तिप्रेष्यांश्च भर्तारं गुरूणां परतो वधु: ॥८१ ॥

कृतघ्ना नास्तिका: पापा निर्मर्यादा हत: त्विष:।
अभक्ष्यभक्षिणो यस्मिन्नाचाररहिता नरा: ॥८२ ॥

---

२६. आदिस्यैश्च तु in B, C, D, E
२७. मन्त्रश्वाव in B, C, D, E
२८. दान्नरू in A

72. (If in the same place) one sits on a broken seat, or eats food sitting on a small couch, where small amount of food as well as drinks are treated like an oblation (it brings no good).

73. If one deviates from the proper method of cooking (*Paṅktibheda*), then the cooking becomes waste and wrongly cooked food is always the cause of difference of opinions (it brings no good).

74. In the evening the wife should sprinkle water where the thorny trees grow, in ant hills where the creepers are without leaves.

75. A pestle, wooden mortar and the seats for ladies will be made out of the fig tree. The pollution of chanting of the *Śastras* is same as the spoiling of cooked rice.

76. It is harmful if one puts fire under the lid of a utensil, or under the ladle, or if one speaks out loudly at night and the fire burns at a very low flame.

77. (It is equally harmful) if one endears one's son, wife or husband in the same way as showing obeisance to one's father and where the grains are scattered to feed the cows or rats.

78- 79. Also, if the milk which is desired for sacrifice is kept uncovered, and the clarified butter is touched by impure hands, and if in front of the children, who are watching eagerly, the elder persons eat edibles (it is despisable). Like the male persons who sleep in the evening before nightfall, those meat eaters who cook rice for their own interest are also despisable.

80, 81. Residents of *Āśramas* and those who belong to different faiths are jealous of each other. They are greedy of the wealth of others and consume articles from the shop. When a disciple is disobedient to his *Guru*, and when the disciple is like a friend to his *Guru*, and when the wife wants punishment for her husband in front of his *Guru* (this situation is not acceptable).

82. Ungrateful (persons), heretics, sinners, those who transgress the law, wretchedly drunk, those who eat inedible foods and where the people do not follow any custom (the situation is not desirable).

भर्त्तादीपश्च भवने यत्र पश्यति मार्जनीम्।
अमार्जितानि भाण्डानि तत्राालक्ष्मीभयं सदा॥८३॥

वेदशास्त्रविहीनं यन्नास्तिका क्रान्तमद्द्विजम्।
ऊर्णनाभादिलालाभिः कीर्णं संस्कारवर्जितम्॥८४॥

स्त्रीजितं स्वामिहीनं च लिङ्गिभिः परिवारितम्।
श्लेष्मवातोच्छिष्टमलैः प्रलिप्तं गोरसादिभिः॥८५॥

केशभस्मतुषाङ्गारप्रेतवृक्षैर्युतं गृहम्।
कपालास्थिसमाकीर्णं श्वापदैः परिपूरितम्॥८६॥

मार्जारनकुलादीनां संघुष्टं कलहारवैः।
द्रव्याश्मकाष्ठैर्देवानां पूर्णं तद्विलयं व्रजेत्॥८७॥
तस्माद्दोषान्परित्यज्य शुभं ग्राह्यं गृहादिषु॥ ८८॥

अथ शुभानि-

सुमङ्गलकथोपेतं सुश्रद्धाह्यष्टरूपकम्।
वृषाजविषमध्वाज्य वीणाभरणचन्दनैः॥८९॥

ताम्रपात्रहयादर्शस्वर्णैर्नित्यं समन्वितम्।
सदानुलिप्तं सन्ध्यासु गृहमम्बुसमुक्षितम्॥९०॥

कृतपुष्पबलिं नित्यं सूर्यावेक्षितदीपकम्।
नित्याग्निसलिलं सूर्योद्दिष्टं [२९]श्रेयं श्रियःप्रदम्॥९१॥

यत्र देवपितृब्रह्माऽतिथिर्गुर्वर्चनं सदा।
मिथो मैत्रीबालवृद्धं बन्धुं स्वजनयोषिताम्॥९२॥

२९. Omitted in BD

83. If the master of a house looks at the lamp as well as the brooms, and the utensils are unwashed, there is always fear of loss of property and affluence.

84. And (the house which is) without the chanting of the Vedas, which is infested by heretics, and devoid of Brahmins, full of cobwebs and devoid of any rituals (is not praiseworthy).

85. A house which is controlled by the womenfolk and without a master, full of persons belonging to other religious faiths, full of mucous, rheum, and full of impure things and besmeared with the urine of cows (is not praiseworthy).

86. A house with hairs, ashes, smouldering fires, trees resided by ghosts, full of skull and bones and full of wild beasts (is not praiseworthy).

The house which resounds with cries of the quarrels of cats and mongooses and where the substances, stones and wood forming the idols are scattered, that house will shortly be destroyed.

87-88. So, one should discard the vices and include auspicious items in the house.

Now the auspicious elements :

89-90. The house is to be full of holy discussions, which are of great veneration and of pleasing character. It will be always adorned with bulls, goats, water, honey, ghee, *Vīṇā* (flute), ornaments, sandal wood, copper vessels, gold. The house will be always decorated and sprinkled with water in the evening.

91. There should always be offering of flowers and the lamps will face the Sun. Daily offering of fire and water dedicated to the Sun is desirable and beneficial.

92. Where there will be daily worship of gods, manes (*Pitṛ*), *Brahmā*, guests and preceptors and where there are good relations among children and old people friends, relations and women.

सुशीला योषितो योग्यं वयसः शयनासनम्।
तिष्ठत्सु गुरुवृद्धेषु कनीयांसो न चासते ॥९३ ॥

यत्र पद्मो महापद्मौ सुरभिर्मोदकाशिनी।
वृषभैरावतौ [३०]तद्वल्कल्यं ते धान्य[३१]सञ्चयः ॥९४ ॥

अशस्त्रा देवता यत्र सशस्त्राश्चहवं विना।
आश्वासनं विषण्णार्त्तदीनानां त्रस्तरोगिणाम् ॥९५ ॥

यत्र भूतदयादानं तपः शौचं तथोद्यमः।
बहुद्वाराणि न यत्र गृहे तत्र सुखं श्रियः ॥९६ ॥

इति श्री सूत्रधारमण्डनविरचिते [३२]वास्तुशास्त्रे वास्तुमण्डने दूषणभूषणाध्यायः सप्तमः श्लोकाः९६ ॥

३०. omitted in B, D

३१. सेचयः in B

३२ वास्तुमण्डने वास्तुशास्त्रे in B, C, D, E,

93. Where the ladies are obedient, and where the seats and beds are worthy of age. Where the juniors will not take their seats in the presence of the preceptor and aged people.

94. Where lilies and lotuses are fragrant and pleasing, and where there are bulls and elephants with proportionate storing of paddy.

95. Where there are Gods without weapons, and if decorated with weapons it will be without battle. Where there is consolation for the depressed, the distressed and the frightened having diseases.

96. Where there is compassion and charity for living beings and penance, purity and enterprise. Where there is not a multiplicity of doors, in that house happiness and prosperity stay forever.

Here ends the 7th chapter titled Defects and Decorations, in Vāstumaṇḍana, the Vāstuśāstra written by Maṇḍana Sūtradhāra.

अष्टमोऽध्यायः

[प्रकीर्णकाध्यायः]

गृहप्रकाराः

शाला तु शुद्धा सम्बद्धा संयुता च परिभ्रमाः ॥
छन्दभिन्ना प्रतिभिन्ना सम्पुटा च प्रतिक्रमाः ॥१ ॥

अलिन्दरहिता शाला शुद्धोक्ता केवला बुधैः ।
अग्रालिन्देन सहिता सम्बद्धा स्याद्दशान्तकम् ॥२ ॥

अलिन्दवेष्टिता बाह्ये शालाश्रेणिस्तु संयुताः ।
पृथगैकैकशालाया अलिन्दश्चान्तरे यदा ॥३ ॥

परिभ्रमा तदा ज्ञेया सर्वशान्तिकरी नृणाम् ।
छन्दभिन्नापवरके फलकेभित्तिकान्तरे ॥४ ॥

शालामध्ये तु षड्दारौ प्रतिभिन्ना सदोत्तमा ।
भित्तिमध्ये यदालिन्दास्तथा बाह्ये च सम्पुटा ॥५ ॥

पृथक्शालाग्र कपिलाद्यलिन्दाग्रे प्रतिक्रमा ।
गृहमाला गृहनाभिः गृहसंघट्ट एव च ॥६ ॥

गृहाणकश्च विज्ञेयं गृहभेदचतुष्टयम् ।
गृहमाला गृहैः कुक्षौ पृष्ठेऽग्रे पंक्तितः स्थितेः ॥७ ॥

दिग्विदिक्ष्वग्रतः पृष्ठे कुक्षौ संघट्ट ईरितः ।
नानाकारापवरकैः सालिन्दैर्गृहनाभिका ॥८ ॥

Chapter VIII
[Prakīrṇakādhyāyaḥ]

Now the varieties of the houses.

Śālā houses may be of eight types, they are *Śuddhā, Sambaddhā,*

1. *Saṁyutā, Paribhramā, Chandabhinnā, Pratibhinnā, Sampuṭā* and *Pratikramā.*

2. A *Śālā* house without any corridor is known as *Śuddhā* by the learned people. *Sambaddhā* type of *Śālā* is connected with the front corridor.

3-4. When rows of *Śālā* houses are surrounded by corridors from outside - they are known as *Saṁyutā.* In each of the separate *Śālā* houses, if there are corridors in between they are known as *Paribhramā.* It bestows all sorts of peace to the human being. When the inner chamber is endowed with a slab in between the partition wall, it is known as *Chandabhinnā.*

5. When a contrivance made of six logs of wood, is placed inside the *Śālā* (which is) beneficial at all times, it is known as *Pratibhinnā.* When the corridors are inside the wall, as well as outside, it is known as *Sampuṭā.*

6-7a. In front of each separate *Śālā,* if there is a corridor designated as *Kapilā* and others then the *Śālā* is named as *Pratikramā.* There are four varieties of houses known as *Gṛhamālā, Gṛhanābhi, Gṛhasaṁghaṭṭa* and *Gṛhāṇaka.*

7b. In the *Gṛhamālā* type of houses, there will be rows of rooms in the front, centre, as well as in the back.

8. The *Saṁghaṭṭā* variety of houses will have rooms on all sides, in the front, back and in the centre. *Gṛhanābhi* is known to have different sizes of inner apartments and corridors.

[१]अधौ भूविस्तृता ऊर्ध्वोर्ध्वभूम्यः स गृहाणकः।
[२]एकद्वारं भवेद्वेश्म निलयं पूर्वपश्चिमे ॥९॥

त्रिद्वारं करणं प्रोक्तं चतुर्भिश्चतुरं विदुः।
माडमौण्ड [३]शुद्धशेखरस्तुङ्गारःसिंहावलोकनाः ॥१०॥

राजवेश्मसु षट्छन्दा विश्वकर्मादिभिः स्मृताः।
[४]माडमर्धोदयं छाद्यं घण्टाकूटादिभिर्युतम् ॥११॥

मौडं तु भद्रे माडाढ्यं मध्येशृङ्गयुतं तले।
सर्वभूम्यो वरं शुद्धं क्रान्तं चतुष्किकम् ॥१२॥

सुरसद्मादिशिखराकारं [४]छन्दं तु शेखरम्।
भद्रे भद्रे तवंगाढ्यं तुङ्गारं द्विघ्ननिर्गतम्।
सिंहावलोकनं कुर्यात्सिंहकर्णैर्विभूषितम् ॥१३॥

मयः शाला तु केवला जाति र्विमानं शिखरान्वितम्।
बद्धाकारशिरोहर्म्यं नानाकाराङ्गसंयुतम् ॥१४॥

अनेकभूमा मालाविबद्धा स्यात्सा तु मालिका।
प्रागुदक् प्रागवाक् प्रत्य[५]गुदग्देतु लाङ्गले ॥१५॥

स्वामिनो [६]मरणं स्याद्धि श्रियै याम्ये प्रतीच्यपि[७]।
अवाक् प्रत्यगुदक् सम्पत् प्रागवागपरो जयः ॥१६॥

---

१. अधोतु विस्तृता in B D E
२. Similar verse in *Aparājitāpṛchhā* ch 69 v 13
३. शेषस्तुंगारः सिंहावलोकनाः in DE
४. omitted in BDE, तत् शुद्धां दिखरम in C
५. गुदग्जे in BCD
६. रमणं in BCDE
७. Similar verse in Mayamatam ch 26 v 18

9-11. When construction of the ground level is wider than the upper levels, then it is known as *Gṛhāṇaka.* A house with one door is known as *Veśma,* (a house) with doors in the East and West is known as *Nilaya.* (A house) with three doors is known as *Karaṇa* and with four doors is known as *Catura. Viśvakarmā* and others prescribe varieties of designs in the royal mansions - they are *Māḍa, Mauṇḍa, Śuddha, Śekhara, Tuṅgāra, Siṁhāvalokana.* The eves board of the *Māḍa* palace will be constructed at half of the height and it will be adorned with bells and summits (*Kūṭa*) or a square aedicule.

12. The central offset of the *Mauḍa* palace is like *Māḍa* and the middle and lower parts will be adorned with peaks. Of all the sites, this one is favourable, it should be unmixed and extended with four pillared pavilions *(Catuṣki).*

13. Temples of the gods and others will be shaped like peaks and the *Chanda* will be *Śekhara.* The *Tuṅgāra,* another *Chanda* of royal mansion, will be projected on the central offset on its body, which will be multiplied by two. *Siṁhāvlokana* should be adorned with *Siṁhakaraṇa.*

14. Maya Śālā houses are of the *Vimāna* type (7-storied) with *Śikharas* (crests). Rooms on the top part will be close knit and these (*Harmya*) will be of different shapes and sizes.

15-16. *Mālikā* is multi-storied and looks like a garland. If the two main buildings of a *Lāṅgala* house are to the East and South or to the East and North or to the West and North, this will bring about the owner's death; if good fortune is desired, they have to be placed to the South and the West. Building to the North, West, and South brings fortune, and building to the East, South, and West brings victory.

दक्षिणे पश्चिमे हीनशालं सूर्प्पं तु दोषदम्।
लाङ्गलं गणिकादीनां सूर्प्पमुग्रोपजीविनाम् ॥१७॥

लाङ्गले चैव सूर्प्पे च पृथक्शालासु सर्वदा।
शालाविरहितस्थाने कुड्यद्वारं प्रयोजयेत् ॥१८॥

[८]द्वारशोभा द्वारशाला द्वारप्रासादहर्म्यके।
द्वारगोपुरमित्येवं पञ्चभेदं हि गोपुरम् ॥१९॥

[९]अथ श्रीधरादिप्रासादाः ॥

एकभागश्चतुःस्तम्भश्चतुर्द्वारः सजालकः।
छाद्यघण्टायुतो माडशोभितःश्रीधरो मतः ॥२०॥

पञ्चयुग्मकरे क्षेत्रे सार्धत्रिंशद्विभाजिते।
मध्ये नवपदं कार्यं भागार्धं भित्तिकाद्वयम् ॥२१॥

मध्यं तु षोडशस्तम्भं स माडं पञ्चभूमिकम्।
भद्रं सार्धं द्विभूमं स्याच्चतुःस्तम्भं च भागिकम् ॥२२॥

चतुर्दिक्षुश्चतुर्द्वारः प्रतापवर्धनः शुभः।
तत्र त्र्यंशायतं भद्रं मुखभद्रं च भागतः ॥२३॥

प्रतिभद्रं दशस्तम्भाः षट्शरा मध्यबाह्यगाः।
भद्रे माडं द्विभूम्योर्ध्वे गृहे पञ्चतलोर्ध्वतः ॥२४॥

---

८. Similar verse in Mayamatam ch 24 v.11

९. Mss DE write following verses :-
श्रीधरश्चैव प्रासादः प्रतापवर्द्धनः परः।
लक्ष्मीविलाससंज्ञश्च श्रीनिवासश्चतुर्थकः ॥
क्षीणिभूषणनामानो पृथ्वीजयश्च षष्टमः।
षट्ष्वेतेषु च प्रासादे श्रेष्ठः स्यादुत्तरोत्तरः ॥

17. The *Sūrppa* type of houses without *Śālā* (main building or hall) to the South and West, cause misfortune. The *Lāṅgala* type of houses are suitable for courtesans and people of that ilk. *Sūrppa* houses are for cruel avocations (*Ugropojīvinām*),

18. In *Lāṅgala* and *sūrppa* type of houses and in all those with only one main building, a wall with a door must be disposed so as to border them where there is no main buildings.

19. *Dvāraśobhā, Dvāraśālā, Dvāraprāsāda, Harmya,* and *Dvāragopura*– these are five respective divisions of gateways (*Gopuras*).

Now the Śrīdhara and other palaces

20. The *Śrīdhara* type of palace is known with one section having four pillars and four latticed doors and it is adorned with bells hanging from the roof. It belongs to the *Māḍa* variety.

21. In a land measuring 25 hands (lengthwise) and 15 hands (in breadth), 9 *Padas* should be kept reserved in the centre and two walls will be erected on the half segment.

22. That *Māḍa* type of palace will be five-storeyed and the central part consists of sixteen pillars. The *Bhadra* will be constructed on the second half storey and in a part there will be four pillars.

23. *Pratāpavardhana* is auspicious with four doors in the four directions. There the portico will be 1/3rd in breadth and the central offset will be from another part.

24 *Pratibhadra*[1] consists of ten pillars and there will be 6 pillars at the centre and 5 in the outer part. In the *Bhadra* (central offset in the plan) *Māḍa* will be constructed above the second storey and in the (other type of) house it will be above the fifth storey.

---

1. *Pratibhadra* :– Sub-division in plan 8 elevation, adjoining the *Bhadra*

लक्ष्मीविलासः प्रासादो नृपाणां तनुते श्रियम्।
क्षेत्रेंशैः पञ्चविंशत्या स्तम्भैः षट्त्रिंशतायुते ॥२५॥

दशमांशसमा भित्तिः चतुर्द्वारं प्रकारयेत्।
भद्रं नवांशमेकांशः मुखभद्रत्रयान्वितम् ॥२६॥

सार्धं त्रिभूमिकं सर्वे स्तम्भाजिनयुतं शतम्।
माडो त्रिपञ्चभूम्यर्धे श्रीनिवासः श्रियःप्रदम् ॥२७॥

अष्टाष्टभक्ते क्षेत्रे तु गर्भः स्यात् सप्तभागिकः।
भित्तिरर्धांशकामध्ये चतुःषष्ठिधरान्वितः ॥२८॥

चतुर्द्वारोऽत्र भद्रं तु पञ्चविंशतिभागिकम्।
भद्रे त्र्यैकांशकं तत्र प्रतिभद्रत्रयं न्यसेत् ॥२९॥

भद्रे स्तम्भाश्चतुः पञ्च सर्वेऽशीत्या शतद्वयम्।
भद्रे माडं त्रिभूम्योर्ध्वे गृहे षड्भूमिकोपरि ॥३०॥

[१०]क्षीणोभूषणसंज्ञोपमा वासो भोगसौख्यदः।
क्षेत्रे तु दशभिर्भक्ते द्वे भित्ती भागमानतः ॥३१॥

शतस्तम्भं युतं मध्यं सार्धसप्ततलान्वितम्।
सप्तपञ्चत्र्येकभागे भद्रेऽष्टाविंशतिर्धराः ॥३२॥

सार्धं त्रिभूमे सर्वत्र स्तम्भाः [११]सार्धशतद्वयम्।
पृथ्वीजयोऽयं प्रासादो राज्ञो सुखजयप्रदम् ॥३३॥

पञ्चविंशतिहस्तादेरष्टोत्तरशतावधिः।
प्रतापवर्द्धनादीस्तु यथायोग्यं प्रकारयेत् ॥३४॥

---

१०. क्षीणी in B

११. सार्कं in B

25. The *Lakṣmīvilāsa* type of palace is conducive to the prosperity of a King. Here, 25 parts of the land will have 36 pillars.

26. The wall will be equal to the 1/10th part and four doors are to be erected. The *Bhadra* will have nine parts out of which one part will contain three *Mukhabhadras*.

27. The *Śrī-nivāsa* brings prosperity if it is three and half storeyed with 124 pillars. There *Māḍa* will be constructed on the 3rd and 5th storeys.

29. If the land is divided into 64 parts (8x8), the foundation will be on the 7th segment. The wall/partition will come within the half of the sixty four scale. There will be four doors and the *Bhadra* will be on the 25th part. The *Bhadra* (central offset) will be divided into three units and in one unit three *Pratibhadras* will be raised. 28-

30. In a *Bhadra* (central offset) the number of the pillars can be 4, 5, and in total from 80 to 200. In a *Bhadra*, the *Māḍa* will be above the third storey and in a house it will be above the sixth storey.

31-33. The *Kṣīṇobhūṣaṇa* type of residence is conducive to enjoyment and prosperity. If the total area of the land is divided by 10 (10x10)[2], two walls are to be measured accordingly. The middle portion will contain 100 pillars and it will be $7\frac{1}{2}$ storeyed. In the 7th, 5th, 3rd, and in the 1st part of the *Bhadra*, there will be 28 scales. In all cases of $3\frac{1}{2}$ storeyed buildings, there will be 52 pillars. So, the *Pṛthvījaya* type of palace will augur victory for the King.

34. According to the prescribed manner *Pratāpavardhana* and others are to be constructed from 25 hands up to 108 hands.

---

2. It will be 100 square *Padavinyāsa* which is found in *Rājavallabhamaṇḍana* also.

एतांस्तु राजप्रासादान् गवाक्षछाद्यजालकैः।
सिंहघण्टासंवरणैः सदण्डकलसध्वजैः ॥३५॥
सिंहकर्णकपोतालीकपिशीर्षैर्विभूषयेत् ॥३६॥

अथ सभा।

क्षेत्रे षोडशभक्ते तु मध्यं स्याच्चतुरंशकम्।
बाह्य एकांशकोऽलिन्दः सभा नन्देति सा मता ॥३७॥

भद्रा द्विभागभद्राढ्या चतुर्भद्रैर्युता जया।
द्विद्व्यलिन्दा चतुर्दिक्षु पूर्णा भद्रैर्युता मता ॥३८॥

क्षेत्रे नवांशे तु कलास्तम्भैर्दिव्या सभा मता।
भद्रैश्चतुर्भिः सा यक्षी त्र्यंशद्व्यंशैस्तु रत्नजा ॥३९॥

उत्पलांशं प्रतिभद्रैर्भूषयेत्ताः सुतोरणैः।
निर्यूहमदला[१२]लूपवितानाढ्यैः सुरूपकैः ॥४०॥

नक्रैः करिहरिव्यालशाल[१३]भञ्जीगणादिभिः ॥४१॥

अथ मण्डपाः।

स्तम्भान्तरं तु सार्धं त्रिहस्तात्सप्तकरावधिः।
एक द्वि-त्रि-चतुः पञ्चभागे भित्त्यन्तरे कृते ॥४२॥

तदेकभाग आयामो विस्तारादधिको भवेत्।
सार्धत्रिहस्तात्सप्तान्तं मण्डपस्योदयो मतः ॥४३॥

षण्मात्रात्करपर्यन्तं [१४]मण्डपे स्तम्भविस्तरः ॥४४॥

---

१२. लूमा in BD

१३. स्तम्भ in B, D

१४. मंडरूपेकोभविस्तरः in B

35-36. These royal palaces should be decorated with latticed window ornamented ceilings, images of lions, bells, ramparts, flagstaffs, pitchers, banners, *Siṁhakarṇa*, roll cornices, battlements.

Now the Council Hall

37. If the land is to be divided into 16 parts, the *centre* will consist of four segments, and one outer part will form the *Alinda*. That type of hall is known as *Nandā*.

38. Two parts of the *Bhadrā* type of hall will have central offset (*Bhadrā*) and the *Jayā* variety is adorned with 4 mouldings (*Bhadrā*). There will be two *Alindas* each on the four sides of *Pūrṇā* and it is also adorned with mouldings.

39. The *Divyā* type of hall will have sixteen pillars on the 9th part of the area. The hall known as *Yakṣī* is adorned with four mouldings while the one known as *Ratnajā* will have mouldings on the third or second part.

40-41. The *Utpalā* type of hall will be decorated with *Pratibhadra*, an elegant arched gateway, small towers (*Niryuha*), sloping roof (*Madalā*), continued pent, roof (*Lūpā*), canopy (*Vitāna*) of beautiful forms aquatic animals, elephants, lions, snakes, and wooden dolls.

Now the pavilion

42. The pillars will have gaps ranging from three and half hands to seven hands. Their division will be made serially from one, two, three, four, five parts.

43. One of its constituent parts will have a length greater than the breadth. The height of the pavilion will be from $3\frac{1}{2}$ hands to seven hands.

44. In a pavilion the extent of a pillar will be from six relative units to one hand.

अथ गृहमण्डपाः ।

युगास्रः षोडशस्तम्भः समर्थो नाम मण्डपः ।
द्वि द्वि स्तम्भविवृद्धया तु भद्रभेदेन संयुताः ॥४५ ॥

भूधरो दक्षसंज्ञश्च देवार्क्षः क्षितिभूषणः ।
कार्या द्विजातिवर्णानां पञ्चैते गृहमण्डपाः ॥४६ ॥

अथ वेदिका ॥

चतुष्कोणा तु या वेदी स्वस्तिका सा शुभासये ।
विवाहेष्वासने यज्ञे राज्ञां देवार्चनादिषु ॥४७ ॥

चतुर्भद्रैर्युता भद्रा लिङ्गादिस्थापने हिता ।
श्रीधरो कोणविंशत्या देवतास्थापनेऽर्चने ॥४८ ॥

वेदी पद्मदलाकारा वसुकोणा तु पद्मिनी ।
[१५]देवपूजाप्रतिष्ठाभिषेकनीराजनादिषु ॥४९ ॥

विप्रादीनां क्रमात्ससषट्पञ्चयुगहस्तकः ।
त्रिद्व्येकहस्तहीनानां [१६]व्यास त्र्यंशोन्नता शुभा ॥५० ॥

विवाहेऽब्धिकरा वेदी गृहस्यैस्शेऽथ वामतः ॥५१ ॥

अथ सिंहासनम् ।

दैर्घ्ये सिंहासनं कुर्या[१७]दुन्नतं षष्ठिमातृकम् ।
पञ्चाशदङ्गुलं मध्यान्तैश्चत्वारिंशता परम् ॥५२ ॥

---

१५. देवी in A
१६. न्यास in B
१७. उत्तमं in A

Now the pavilion of a house

The pavilion known as *Samartha* is a square one with sixteen pillars. With the addition of two more pillars and different types of mouldings (called) *Bhūdhara, Dakṣasaṁjñga, Devārkṣa, Kṣitibhūṣaṇa Maṇḍapas* are built. These five types of house pavilions are to be built for Brahmins and others. 45- 46.

Now the altars

A quadrilateral altar known as *Svastikā* is auspicious for marriage, as a seat, in a sacrifice and for the worship of the King. 47.

Attached with four *Bhadrās*, the *Bhadrā* type of altar is auspicious for the consecration of *Liṅgas*. The *Śrīdhara* with 20 corners is suitable for the consecration for praying to the Gods. 48.

The *Padminī* type of altar is eight cornered, and shaped like the petals of a lotus and auspicious for the worship of Gods, consecration, coronation, lustration of arms and so on. 49.

The length of the altar of the Brahmin and others will be 7, 6, 5, 4 hands respectively. The breadth will be three, two, one hands short and if the height is 1/3rd of the breadth then it is regarded as auspicious. 50.

For a marriage, the altar will be of 7 hands and it will be placed either towards the North-East corner or to the left side of a house. 51.

Now the Royal Throne

For the measurement of the length of a royal throne the height will be up to 60 relative units. The medium one will be up to 50 *Aṅgulas* and the smaller one begins from 40 *Aṅgulas* onwards. 52.

[१८]व्यासे दशाङ्कवस्वंशहीनं [१९]दैर्घ्यार्धमुन्नतम्।
व्यासे शरांशे वा सप्तभागे भद्रं त्रिभागिकम्।।५३।।

षडशीत्योदये भक्ते तत्र भिट्टं युगांशकम्।
जाड्यंकुम्भं तु सप्तांशं कन्दमंशेन कारयेत्।।५४।।

कणपालीं तु वेदांशां [शी] द्व्यंशमन्तरपत्रकम्।
कर्णौ द्विभागिकं कुर्याद् ग्रासपट्टी युगांशकम्।।५५।।

गजाः शिवैर्हया नन्दैर्नराः सप्तभिरंशकैः।
वेदी शक्रे रसैः छाद्यं तिथिभिर्मत्तवारणम्।।५६

विधेयास्तु नरा वेद्या एकांशेन विनिर्गताः।
द्वाभ्यां हयास्त्रिभिर्नागा ग्रासपट्टीयुगांशकैः।।५७।।

ततः कर्णो द्विभागेन कन्दो ग्रासवती समः।
कन्दात्षडंशैः कणकं कंदाच्च खुरकं शिवैः।।५८।।

[२०]भिट्टमेकांशकं तस्माच्चतुस्तम्भं सतोरणम्।
समाडं घण्टाकलशं ज्येष्ठं स्तम्भैर्विनापि वा।।५९।।

गजाश्वोनं तत्र सिंहैर्युतं तत्कीर्त्तिवर्धनम्।
ज्येष्ठं गजहयैर्हीनं तोरणाढ्यं सुखासनम्।।६०।।

अथ गवाक्षः।

गवाक्षो लुम्बिकाहीनस्त्रिपताकः स केवलः।
द्विलुम्बिकः स्यादुभयो र्नन्द्यावर्त्तश्चतुर्युगः।।६१।।

---

१८. ब्यासै/ब्यासं in ACDE
१९. दैर्ध्यार्थ in B C, दैर्ध्याश्च in DE
२०. एकहस्ते तु प्रासादे भिट्टं वेदाङ्गुलं स्मृतम्
एकतः पञ्चहस्तान्तं हस्तेचैकैकमङ्गुलम् अ पृ ch १२३ v १९

53. The breadth will be less by 10, 9, 8, and the height will be half of the length. Of the 5th part or of the 7th part of the breadth, *Bhadra* will cover three parts.

54. Of the height measuring 86 units, the ridge will be about 4 parts (*Yugāṁśa*). *Jāḍyakumbha* (a prominent mould of a *Jagati*) will occupy 7 parts and a knot should also form a part.

55-56. The iron rod (*Kaṇapālī*) will occupy 4 parts and the recess between mouldings will be of two parts. The helm (*Karṇa*) will occupy two parts and the horizontal band known as *Grāsapaṭṭī* will occupy 4 parts, the elephant by 11th part, horses by 9th part, the nymph are by 7th part, the platform by 14th part, the *Chādya* by 6th part, the *Mattavāraṇa* by 15th part.

56-57. *Narā* (nymphs) are to be extended by one part of the royal throne, the horse will be on the second part, the elephant on the third, and the horizontal band (*Grāsapaṭṭī*) will be on the fourth part.

58. Then the helm in the two parts will correspond to the knot fixed in the metal part. The *Kaṇaka* will be measured from the sixth part of the knot *(Kanda)*. The heel will be measured by the eleventh(*Śiva*) part from the knot.

59. The rafter will be erected on the first part and the gate will comprise of 4 pillars. The largest type of throne will be adorned with *Māḍa,* bells, pitchers, and with or without pillars.

60. That throne which is bereft of elephants and horses but marked by lions is conducive to fame. The best one is also short of horses and elephants but adorned with a gate and that type of throne is comfortable for use.

Now the latticed window

61. A latticed window is devoid of *Lumbikā* and it is adorned with three *Patākās* only. It may have two *Lumbikās* on both the sides and if four *Lumbikās* are on the four sides, it is known as *Nandyāvarta.*

अष्टलुम्बि प्रियमुखो रविलुम्बिस्तु सन्मुखः।
छाद्यैनैकमुखः छाद्यपंक्तियुग्मे प्रियाङ्कः ॥६२॥

पद्मनाभस्त्रिभिः छाद्यैर्दीपचित्रस्तु तैर्युगैः।
विचित्रः पञ्चभिः छाद्यैः पञ्च भेदा [२१]इति पृथक् ॥६३॥

आयामेऽभ्यधिकः सिंहो हंसः स्याद्विस्तरेऽधिकः।
बुद्धिदश्चतुरस्रो सौमभद्रो बुद्धिसागरः ॥६४॥

गरुडः पक्षसहितो वामे दक्षे सजालकः।
राजसेनासनछाद्यवेदिकामत्तवारणैः ॥६५॥

गवाक्षाः शोभिता राज्ञां सिंहजालैलकादिभिः।
अनेकाकारविन्यासरन्ध्रैरभिविराजितम् ॥६६॥

विदध्याज्जालकं धीमांस्तथा चन्द्रावलोकनम् ॥६७॥

अथ छाद्यम्।

गृहोदयार्धनिष्क्रान्तं छाद्यं पट्टसमं शुभम्।
करालं कुमुदाकारं कलापं [२२]सूर्प्पसन्निभम् ॥६८॥

प्रलम्बं काकपक्षाभं तत् षोढाकारभेदतः।
जलपट्टी तु पादांशा पिण्डे व्यासे गुणाङ्गुला ॥६९॥

---

२१. सूर्य in B
२२. सूर्य in B

62. With 8 *Lumbis* it is known as *Priyamukha* and with 12 *Lumbis,* it is known as *Sanmukha.* With one *Chādya* it is known as *Ekamukha* and with two *Chādyas* in a row it is known as *Priyāṅgaka.*

63. With three *Chādyas,* it is known as *Padmanābha* and with four *Chādyas* it is known as *Dīpacitra.* It is known as *Vicitra* if adorned with five *Chādyas.* These are the five different types.

64. If the length is greater it is known as *Siṁha* and if the breadth is greater it is known as *Haṁsa.* The square one is known as *Buddhida* and the *Buddhisāgara* is having *Bhadra* in the North.

65. The *Garuḍa* will have wings on the right and left sides and it will be a latticed one. It will be adorned with *Rājasena* seats, *Chādya* platform and *Mattavāraṇa.*

66. For a King's house the latticed windows are decorated with lion-like nets(*Siṁhajāla*), Elaka and others. The latticed windows will be displayed in different shapes and arrangements.

67. A wise person will arrange trellis as well as *Candrāvalokana* properly.

Now the Chādyam

A *Chādya* is regarded as auspicious if it is projected from half of the height of a house and equal to the *Paṭṭa* (slab).

According to the different shapes, they are of six varieties– *Karāla,Kumuda* (shape of a lotus), *Kalāpa* (moon), shape of a *Sūrppa, Pralamba* (prolonged) and *Kākapakṣābha* (like the wings of a crow).

68-69. The water- band (*Jalapaṭṭī*) will be 1/4th of the whole dimension, and its width will be of 3 *Aṅgulas.*

मुखपट्टी तदग्रे तु पिण्डे सार्धद्विमात्रिका।
[२३]त्र्यङ्गुला विस्तरे श्रेष्ठा ततश्छाद्यं युगाङ्गुलम् ॥७०॥

अङ्गुला विस्तरे दण्डाः सपादद्व्यङ्गुलोदयाः ॥७१॥

अथ छत्रः ॥

छत्रं व्यासे त्रिधा सार्धं द्वित्रिसार्धं त्रिभिः करैः।
पञ्चाशदङ्गुलं दैवं दण्डो हेमचतुष्करः ॥७२॥

रत्नैः सार्धकरं यावत्काष्ठकाञ्चनरुप्पजः।
विश्वातैर्विषमैर्दण्डश्चामरः पर्वभिर्युतः ॥७३॥

[२४]अथ अर्चापीठम् ॥

अर्चापीठं तु षण्मात्रात्करावधिशुभद्रुमैः।
वेदास्त्रमायतं वृत्तं व्यासपादान्तमुन्नतम् ॥ ७४ ॥

मणिमुक्ताप्रवालार्कः रुप्यस्फटिकहेमजाम्।
एकाङ्गुलाद्वितस्त्यन्तं प्रतिमां पूजयेद्गृहे ॥ ७५ ॥

दीपस्तम्भः कराद्रामहस्तान्त धातुदारुजः।
सपीठकुम्भकलशःसकङ्कण [२५]फलः शुभः ॥ ७६ ॥

अथ शय्या ॥

स्व-स्व व्याससमायामा शय्या दैर्घ्यार्धे विस्तरा।
स्व-स्व हस्तसमोत्सेधा पादव्यासः षडङ्गुलः ॥७७॥

---

२३. अङ्गुला in ACDE
२४. omittled in BCDE
२५. कणः in A

70-71. In front of these there will be *Mukhapaṭṭī* and its dimension will be $2\frac{1}{2}$ *Aṅgulas*. It is regarded best if the width is three *Aṅgulas* and then the *Chādya* is of four *Aṅgulas*. The pillarets is $2\frac{1}{2}$ *Aṅgulas* in width if counted by the *Aṅgulamāna*.

Now the Umbrella

The circumference of the umbrella will be of three sizes : it is measured by $2\frac{1}{2}$ or $3\frac{1}{2}$ and 3 hands.

72. The divine scepter will be of 50 *Aṅgulas* and made of gold and quadrangular in shape.

The divine scepter can be made of wood, gold or silver and up to half the *Kara* it will be adorned with gems.

73. The scepter will be uneven on all sides and the chowrie will be added with knots.

Now the Pedestal of Worship

74. The pedestal of worship is to be measured from six *Mātrās* to one hand and it will be made of good quality wood. It may be square, rectangular, or round in shape. The height will be one *Pāda* of the circumference.

75. The idol is to be made of gems, pearls, corals, crystals, silver, quartz, gold. In a house the idol measuring from one *Aṅgula* to *Vitasti* (9 *Aṅgulas*) is to be worshipped.

76. The lamp-stand will be from one hand to three hands and it will be made of metal or wood. That will be adorned with pedestal, pot, and pitcher and bangles and such a lamp-stand augurs well.

Now the Beds

77. The cot will be made according to one's own length and breadth and the width will be half of the length. The elevation of the bed will be according to one's own hand, and one fourth part of the width will be six *Aṅgulas*.

स्व-स्ववेदाङ्गुला व्यासे इष्टे पिण्डे गुणाङ्गुला ॥७८ ॥

वराहः ॥

हस्तात्सपादात् युग्मान्तं शय्या स्याद्द्विगुणायता।
उच्चाद्दैर्घ्यं तृतीयांशे पादे वा विविघाकृतिः ॥७९ ॥

प्रदक्षिणाग्रं काष्ठं स्याद्दीषायोगे शुभप्रदम्।
शिरीषशिंशपाशाकचन्दनाञ्जनधन्वनाः ॥८० ॥

देवद्रुमो[२६]ऽम्बुहारिद्रास्तिनिसः पनसोऽशनः।
शालः कालार्जुनो निम्बः श्रीपर्णी तिन्दुकस्तथा ॥८१ ॥

मधुकः पद्मकः श्रेष्ठा यानशय्या[२७]सनेष्वपि।
एकद्विदारुजा शय्या कार्या न बहुदारुजाः ॥८२ ॥

यवमध्याण्डपर्वा भाविकर्णा पितृत[२८]र्पिणी।
स्वामिमानादत्यधिका हस्वा शय्या न शोभना ॥८३ ॥

अथ शिविका ॥

शिविका सार्धहस्तादित्र्यङ्गुलर्धा त्रिधा [२९]पृथुः।
दैर्घ्ये सपादा सार्धा वा व्यासकर्णमितापि वा ॥८४ ॥

दृढालोहे भदन्ताद्यैर्योग्येऽथ श्रीमतां नृणाम् ॥८५ ॥

अथ गृह[३०]प्रवेशः।

निष्पन्ने न विशेच्छीघ्रं चिरं नापि विलम्बयेत्।
गृहे श्रयन्ति भूताद्याः प्रवेशरहितं चिरम् ॥८६ ॥

---

२६. Reference of this Ambu tree is found in वृहत्संहिता Vol II, ch 79. V17.

२७. सनेष्विमे in A

२८. तर्प्पणी in A

२९. पुष्पु in A

३०. निवेशः in ACDE

78. The width will be one's own 4 *Aṅgulas* (or *Hastas*) and the desired circumference will be 3 *Aṅgulas.*

Varāha

79. The bed will be twice in breadth. From the height, the third or fourth part of the length should be of different shapes.

80-81. The square wooden frame of four corners, if added with elephant tusks, is auspicious.

82. *Śirīṣa, Śiṁśapa, Śāka, Candana, Añjana, Dhanvana, Devadruma, Ambu, Haridrā, Tinisa, Panasa, Aśana, Sāla, Kāla, Arjuna, Nimba, Śrīparṇī, Tinduka, Madhuka, Padmaka* are considered the most useful for vehicles, beds and seats. The bedstead should be made of one or two varieties of wood, not with many varieties of wood together. 80-

83. A bed with *Yava* in the centre or with (*Aṇḍa*) oval shaped joints, *Bhāvikarṇa* or *Pitṛtarpiṇī* and being too big or too little in respect of the owner is not pleasant (*Śobhana*).

Now the Palanquin

The breadth of a palanquin will be of three varieties, the size may be from one and half hands and two or three *Aṅgulas.*

84-85. Its length will be one-fourth or half or equal to the width of the corner division. It should be made strong with iron, which will be suitable for monks (*Bhadanta*) and prosperous men.

Now the entry into the house

86. After the completion of a house the owner should not wait too long and should try to enter the house as early as possible. The spirits enter therein if it remains unoccupied for long.

सौम्यायने दिने शुद्धे रिक्ता भौमार्कवर्जिते।
रोहिण्यां [३१]शतभे पुष्ये चित्रास्वात्युत्तरामृगे ॥८७ ॥

धनिष्ठापौष्णमैत्रेषु प्रवेशः शुभदो गृहे।
प्रवेशे सूर्य[३२]सद्मनि स्ततो वेदेषु तूद्वसम् ॥८८ ॥

चतुर्थोऽर्थोऽब्धिषु श्रेयश्चतुर्थ कलहोऽन्वहम्।
युगेषु गर्भनाशः स्यात् त्रिषु वासश्चिरं भवेत् ॥८९ ॥

सुखं कलशचक्रे स्यात्त्रिषु भेषु प्रवेशने।
शुभे निमित्ते शकुने स्थिरे लग्ने स्थिरांशके ॥९० ॥

[३३]मूर्त्तादुपचये स्वीये राशौ लग्ने विधोर्बले।
सौम्यै स्त्रिकोणकेन्द्रस्थैः केन्द्राष्टान्त्यं विना परैः ॥९१ ॥

त्रिषडायगतैर्वा तैः प्रवेशः शुभदो गृहे।
माङ्गल्यैरङ्कुरैदीपैः स्त्रग्भिः कदलिभिर्युते ॥९२ ॥

अश्वत्थ[३४]चूत[३५]पत्राद्ये सकन्यातोरणे गृहे।
वासयित्वा दिने पूर्वे ब्राह्मणान्सुरभीर्वृषान् ॥९३ ॥

तत्र होमं जपं कुर्यात् स्वाध्यायं स्वस्तिवाचनम्।
तगरागरुकुष्टाग्रा निशाभिस्तत्प्रलेपयेत् ॥९४ ॥

चन्दनादैर्भुवं सिक्त्वा निशायामधिवासनम्।
गृहे पूर्वोत्तरे सूर्यदशाष्टकरमण्डपे ॥९५ ॥

---

३१. श्रवणे in A
३२. भेद्मानि in BC
३३. मूर्त्तावुपचये in A
३४. कृत in C
३५. पत्राये in CD पत्रथि in B

87-88ab. In the *Uttarāyaṇa* (*Saumyāyana*) month, on a favourable day except in the *Rikt, tithī*, Tuesday and Sunday, it is auspicious to enter one's house in the assemblage of *Rohiṇī, Śatabha, Puṣyā, Citrā, Svātī, Uttarā, Mṛgaśirā, Dhaniṣṭhā, Pauṣṇa* and *Maitra* stars.

88cd-89. The fourth solar position is regarded as inauspicious for the inaugural entry to the house. Amongst the fourth, fifth (*artha*) and seventh inauspicious solar positions, the fourth brings enmity and quarrelling day after day. If entry to the house is made in the fourth solar position, the base of the house will collapse or be destroyed, whereas in the third solar position the house gets stabilized and becomes permanent.

90. Three stars out of twenty-seven *nakṣatra* entering into *kalaśacakra*, good omens, fixed *lagna* and *aṁsa* are all auspicious and entrance to the house at those times and moments gives much pleasure to the owner.

91-92ab. It is auspicious to enter into one's house by the owner on his third, sixth, tenth and eleventh planetary position(*mūrta*), when *lagnas* of his birth chart and lunar position are favourable, the *āyas* are in third and sixth position and when in the center of the *trikoṇa* there are auspicious planets, while inauspicious planets are in places other than his 8th and 12th planetary position.* (vide note below) With auspicious materials, sprouts, lamps, garlands, and plantains, and with the twigs of *Aśvattha* and mango, one should enter the house through the portals with his daughter.

92cd-94. On the previous day, with *Brahmins* incense and a bull, one should perform oblations, utter prayers, chanting of Vedas and auspicious spells. He should smear the place with *Tagara, Agaru, Kuṣṭa, Agra* on the previous night.

95. The land is to be moistened with sandal wood, water etc and they should start staying there at night in the *Maṇḍapa* which are measuring twelve, ten or eight hands and set up in the N.E. corner of the house.

* Note:
In this section the time and moment for inaugural entrance into one's house for residing has been laid down. Some particular constellation of stars are auspicious, others are not congenial. This concerns the Astronomy known in those days.

सूत्रधारः सोपवीतः सालङ्कारः सिताम्बरः।
शालिभिर्दण्डमाने तु स्थण्डिले गृहमध्यगे ॥९६॥

[३६]विन्यस्य वास्तुं वस्त्रोर्ध्वे कलशांस्तत्समन्ततः।
स्थापयेन्नव वा पञ्च नववस्त्र[३७]समावृतान् ॥९७॥

सुगन्धोदकसम्पूर्णान्मणिहेमसमन्वितान्।
वास्तुदेवान्समाबाह्य सम्पूज्याथ बलिं हरेत् ॥९८॥

इन्द्रादिभ्यो दिगीशेभ्यो दद्यात्स्व स्व दिशि क्रमात्।
दिग्विदिक् स्तम्भमूलेषु दिवारात्र्यम्बुचारिणाम् ॥९९॥

[३८]नागेभ्यो भुवि सर्वेभ्यो देवेभ्यस्तु बलिं [३९]दिवि।।
श्रियैस्तु शयने मन्त्रैः प्रणवादिनमोऽन्तकै ॥१००॥

[४०]पृष्ठतः पूजयेद्वास्तुं सर्वं तक्षकसाधनम्।
ततो मन्दिरमध्यस्थः स्थपतिः प्रवदेदिदम् ॥१०१॥

ब्रह्मा विष्णुः शङ्करः सर्वदेवाः क्षोणिर्लक्ष्मीवाग्वधूः सिंहकेतुः।
ज्येष्ठा विश्वेदेवताश्च प्रजानां श्रीसौभाग्यारोग्यभोग्यं सृजन्तु ॥१०२॥

निरुजामुदितासघनाप्रथिता यशसामहताद्भुतवीर्ययुता।
सततं निरुपद्रवकर्मयुता पृथिवीपति जीवतु धर्मविधेः ॥१०३॥

धारानिपातात्सलिलप्रकोपाद्दंष्ट्रानिपातात्पवनप्रकोपात्।
अग्नेश्च दाहान्मुखिताच्च चोराद्रक्षत्विदं सद्म शिवं च मेऽस्तु ॥१०४॥

गृहं सम्मार्ज्य तत् सिञ्चेत्सुगन्धिकलशोदकैः।
धान्यान्यगृहवस्तूनि स्वे स्वे स्थाने प्रविन्यसेत् ॥१०५॥

---

३६. गृहस्य in DE वान्यस्य in B
३७. समादृतान् in A
३८. छागेभ्यो in A
३९. ददेत् in E
४०. षष्ठतः in B

96. The thread holder (*Śutradhāra*) wearing the sacred thread (*Upavīta*), ornaments and dressed in white cloths will enter the measured ground prepared for sacrifice at the center of the house with corns(*Śāli*).

97. In that plot of land, one will place pitchers on the cloth. The pitchers, numbering nine or five, will be covered with new clothes.

98. The pitchers will be filled up with scented water, gems, gold. He will invoke a worship to the presiding deities *Vāstudeva* and then offer the oblation.

99. He will present offerings to *Indra* and other (eight) *Dikpālas* of their own directions serially. Then he will also offer worship to the deities residing at the foundation of the pillars and deities residing in the water throughout day and night.

